# 2 घटाध्यायः – वेदाङ्गेषु तत्त्वार्थ दर्शनम्

Let this adhyāya begin, by offering this maṅgala-śloka:

छन्दः पादौ यस्य हस्तौ कल्पसूत्राणि तथा
मुखं व्याकरणं स्मृतं पुनः घ्राणं च शिक्षा ।
ज्योतिषं तु चक्षुरिन्द्रियं श्रोत्रं च निरुक्तं
तस्मै वेदपुरुषाय नमो नमः शिवाय ॥

Whose feet are the Chandas; And whose hands are the Kalpasūtras; Whose mouth is known as Vyākaraṇam; And again, the nose is the Śikṣā; Jyotiṣam is his sense of seeing; And Niruktam is his ear. To that Veda-puruṣa, I surrender my'self' to that Śiva.

ऋचो यजूंषि चान्यानि सामानि विविधानि च ।
एष ज्ञेयस्त्रिवृद् वेदो यो वेदैनं स वेदवित् । इति मनुस्मृतिः ॥

भारतीय वाङ्मये वेदानां प्रमुख-स्थानं वर्तते । विदन्त्यनेन धर्माधर्मौ इति वेदः । विद ज्ञाने इति धात्वर्थः । वेदानां भाषा भावश्च दुरूहौ । अतः वेदार्थानवबोधाय वेदाङ्गानाम् अपेक्षा भवति । पतञ्जलिना अपि उक्तम्—

ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च (महाभाष्ये पस्पशाह्निके 3.1.3) ।

अङ्ग्यते ज्ञायते अनेन इत्यङ्गम् । अर्थात् यस्मात् स्वरूपज्ञानं अवगम्यते तदङ्गमिति । किमस्ति स्वरूपज्ञानम् – तदा द्रष्टुः स्वरूपेऽवस्थानम् (इति योगसूत्रम् 1.1) । यदा चित्तवृत्तीनां निरोधः भवति तदा स्वरूपस्थानं भवति । तस्य वर्णनम् यथा— स्थूलसूक्ष्मकारणशरीराद्व्यतिरिक्तः पञ्चकोशातीतः सन् अवस्थात्रयसाक्षी सच्चिदानन्दस्वरूपः सन् यस्तिष्ठति स आत्मा (तत्त्वबोधः 2.2) । "अन्नमयः, प्राणमयः, मनोमयः, विज्ञानमयः, आनन्दमयः" इति तैत्तिरीयोपनिषदि अस्य पुरुषस्य पञ्चकोशाः व्याख्याताः । अत्र मनोमयकोशस्य वर्णनं यथा—

यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा ।
(तैत्तिरीयोपनिषत् – आनन्दवल्ली - तृतीयानुवाकः) ॥

एवं वेदवाङ्मयमेव पुरुषस्य मनोमयकोशं सूचयति । तस्य वेदाध्ययनस्य अधिकारप्राप्त्यै अध्येतव्यांशा एव वेदाङ्गानि । वेदाङ्गैः सह् वेदपुरुष ज्ञानमेव कैवल्यसाधकम् भवति । यथाचोक्तं श्वेताश्वेतरोपनिषदि—

वेदाहमेतं पुरुषं महान्तम् आदित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ इति 3.8 ॥

**षडङ्गसहितः वेदपुरुषः ।**

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ।। 41 ।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्येव ब्रह्मलोके महीयते ।। 42 ।। इति पाणिनीय शिक्षा ।

अत्र उच्चारण-गति-गानादि विधिना वेदवाङ्मयस्य शब्द रक्षणार्थं शिक्षा-छन्दश्शास्त्रयोः विनियोगः ।

- शब्दमय मन्त्राणां यथार्थोच्चारणाय प्रवर्तमानं वेदाङ्गं शिक्षा इत्यभिधीयते ।
- गायत्र्यादिषु बद्धानां वेदानां उच्चारणर्थं च गत्यादीनां ज्ञानार्थं च छन्दोज्ञानं नितरामपेक्षितम् ।

पुनः वेदवाङ्मयस्य अर्थावबोधने व्याकरण-निरुक्त-शास्त्रयोः विनियोगः ।

- रक्षा-ऊहा-आगम-लघु-असन्देहाः इति व्याकरण-शास्त्रानुसारेण शब्दानुशासनस्य प्रयोजनाः ।
- निरुक्तस्यास्ति विषयः वैदिकपदानां व्युत्पादनम् । निरुच्यते निश्शेषेणोपदिश्यते तत् तदर्थावबोधनाय पदजातं यत्र तन्निरुक्तमिति कथ्यते ।

ततःपुनः वेदवाङ्मयस्य अनुष्ठानादि पूर्वक ज्ञानार्जने ज्योतिष-कल्प-शास्त्रयोः विनियोगः ।

- वेदविहितकर्मानुष्ठाने उचितानुचित कालनिर्णयार्थं ज्योतिषम् उपयुज्यते ।
- वैदिक कर्मकाण्डस्य यज्ञयागस्य च यथार्थानुष्ठानाय प्रवृत्तमङ्गं कल्प इति कथ्यते ।

तथा वेदाङ्गानाम् अध्ययने सति शब्द-अर्थ-ज्ञानानाम् समापत्तिर्भवति । तदेव पतञ्जलिना सवितर्का समापत्तिः इति व्याख्यातम् । तत्र शब्द-अर्थ-ज्ञान-विकल्पैः सङ्कीर्णा सवितर्का समापत्तिः । इति योगसूत्रम् 1.42 ॥ पुनः, स्मृति-परिशुद्धौ स्वरूप-शून्य-इव अर्थमात्र-निर्भासा निर्वितर्का । इति योगसूत्रम् 1.43 ॥ अतः षडङ्ग-सहित-वेदाध्ययस्यान्ते अर्थमात्र-निर्भासत्वेन असम्प्रज्ञातो योगः भवति ।

## 2.1 शब्दावबोधने शिक्षा-छन्दसी ।

### 2.1.1 शिक्षा घ्राणं तु वेदस्य ।

शिक्षा = शिक्ष्यते ऽनयेति वर्णाद्युच्चारणलक्षणम् । शब्दानां उच्चारणे दोषाः सन्ति चेत्, तेषाम् अर्थ दोषः भविष्यति, तस्मात् साधकस्य नाशः अपि भविष्यति । यथा, इन्द्रशत्रुर्वर्धस्व इति शब्दस्य उच्चारणदोषात्, वृत्रासुरस्य नाशोऽभवत् ।

- अन्तोदात्त → इन्द्रस्य शत्रुः । इन्द्रशत्रुं ।
- आद्युदात्त → इन्द्रः शत्रुः यस्य सः । इन्द्रशंत्रु ।

शिक्षाशास्त्रस्य मौलिकांशाः वर्ण्यन्ते यथा तैत्तिरीयोपनिषदि शिक्षावल्ल्यां द्वितीयानुवाके —

अथ शीक्षां व्याँख्यास्या॒मः । वर्ण॒ः स्वरः । मात्रा॒ बलम् । सामं सन्ता॒नः । इत्युक्तः शीँक्षाध्या॒यः ॥ 1.2.1

पुनस्तत्र बहवः ग्रन्थाश्च प्रातिशाख्याश्च शिक्षावबोधने विराजन्ते । शिक्षासाहित्ये केचन ग्रन्थाः – व्यासशिक्षा, भरद्वाजशिक्षा, पाणिनीयशिक्षा, याज्ञवल्क्यशिक्षा, वासिष्ठीशिक्षा, कात्यायनीशिक्षा... इत्यादयः । तत्र, षष्टिश्लोकात्मिका पणिनीया शिक्षा लोकप्रसिद्धा अस्ति ।

#### 2.1.1.1 पाणिनीया शिक्षा

Pāṇinīya śikṣā explains the process of speech, as the antaḥkaraṇa vṛtti, reflecting the saṃskārās in buddhi, uniting with manas, igniting the kāyāgni and invoking the prāṇa to manifest the sound—

आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥6॥

आत्मा = अन्तःकरणम् , संस्काररूपेण, स्वगतान् अर्थान् , बुद्ध्या - स्ववृत्त्या , समेत्य - एकबुद्धिविषयान् कृत्वा , तद्बोधनेच्छया मनःयुक्तं करोति । (लघुशब्देन्दुशेखरः - संज्ञाप्रकरणम्) । This speech is described to have four forms parā, paśyantī, madhyamā and vaikharī, depending on the vṛtti at each level:

| परा | पश्यन्ती | मध्यमा | वैखरी |
|---|---|---|---|
| आत्मा | बुद्धि → मनः | कायाग्निः → मारुतः | शब्दः |

## शिक्षाशास्त्रे व्याहृत्युपासनम्

मारुतस्य सञ्चारम्, तस्मात् स्वरवैविध्यं, सवनत्रयं, पुनस्तत्र गायत्र्यादि व्याहृतित्रयं च व्याख्यातम्—

> मारुतस्तु उरसि चरन् मन्द्रं जनयति स्वरम् ।
> प्रातःसवन योगं तं छन्दो गायत्रम्+आश्रितम् ॥7॥
> कण्ठे माध्यन्दिन युगं मध्यमं त्रैष्टुभानुगम् ।
> तारं तार्तीय सवनं शीर्षण्यं जागतानुगतम् ॥8॥
> प्रातः पठेन्नित्यम्+उरःस्थितेन स्वरेण शार्दूल रुतोपमेन ।
> मध्यंदिने कण्ठगतेन चैव चक्राह्व-संकूजित-सन्निभेन ॥36॥
> तारं तु विद्यात् सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम् ।
> मयूर-हंसान्यम् ऋत-स्वराणां तुल्येन नादेन शिरःस्थितेन ॥37॥

*Table 2. Vyahṛti Upāsana in Pāṇinīya Śikṣā*

| प्रातःसवनम् | माध्यन्दिनम् | तार्तीय सवनम् |
|---|---|---|
| उरसि चरन् | कण्ठे | शीर्ष्ण्यम् |
| मन्द्रं स्वरम् | मध्यमं स्वरम् | तारं स्वरम् |
| गायत्री | त्रिष्टुप् | जगती |
| शार्दूल रुतोपमा | चक्राह्व सङ्कूजितम् | मयूर-हंस स्वर तुल्यम् |

This gross sound is manifested into 63/64 syllables as explained below:

> त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः ।
> प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥ 3 ॥
> स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
> यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥ 4 ॥
> अनुस्वारो विसर्गश्च क पौ चापि पराश्रितौ ।
> दुःस्पृष्टश्चेति विज्ञेयो ऋकारः प्लुत एव च ॥ 5 ॥

64 वर्णाः = 21 स्वराः + 25 स्पर्शाः + 8 यादयः + 4 यमाः + 1 अनुस्वारः + 1 विसर्गः + 1 :क् + 1 :प् + 1 दुःस्पृष्टः (ळ) + 1 ऌ3

## पञ्चधा विभागः ।

All these 63/64 syllables of Sanskrit are classified into each of these five types based on svara, kāla, sthāna, prayatna and anupradāna—

सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः ॥ 9॥
स्वरतः कालतः स्थानात्प्रयत्नादनुप्रदानतः ।
इति वर्णविदः प्राहुर्निपुणं तन्निबोधत ॥ 10॥

*Table 3. Fivefold classification of Sanskrit syllables*

| | |
|---|---|
| 1. स्वरतः | उदात्तः, अनुदात्तः, स्वरितः ।<br>• उदात्तः = निषाद-गान्धारौ ।<br>• अनुदात्तः = ऋषभ-धैवतौ ।<br>• स्वरितः = षड्ज-मध्यम-पञ्चमाः । |
| 2. कालतः | ह्रस्वः, दीर्घः, प्लुतः । |
| 3. स्थानात् | 1. उरः, 2. कण्ठः, 3. शिरः, 4. जिह्वामूलम्, 5. दन्ताः, 6. नासिका, 7. ओष्ठौ, 8. तालुः ।<br>(अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालुः । ऋटुरषानां मूर्धा । ऌतुलसानां दन्ताः । उपु+उपध्मानीयाम् ओष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वमूलीयस्य जिह्वामूलम् । नासिकानुस्वारस्य । इति स्थानानि ।) |
| 4. प्रयत्नः | अभ्यन्तर प्रयत्नः → स्पृष्टम्, ईषत्स्पृष्टम्, (ईषत्विवृतम्,) विवृतम्, संवृतम् |
| 5. अनुप्रदानः | बाह्य प्रयत्नः → विवार, संवार, श्वास, नाद, घोष, अघोष, अल्पप्राण, महाप्राण, (उदात्त, अनुदात्त, स्वरित) |

### (1) & (2): स्वरत्रयं च कालभेदाश्च ।

| स्वरतः / कालतः | उदात्तः | अनुदात्तः | स्वरितः |
|---|---|---|---|
| ह्रस्वः | अ॑ | अ॒ | अ |

| | | | |
|---|---|---|---|
| दीर्घः | आ॑ | आ॒ | आ |
| प्लुतः | अ॑3 | अ॒3 | अ3 |

**नवपद शय्या – 9 types of svara:**

अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम् ।

मध्योदात्तं स्वरितं द्युदात्तं त्र्युदात्तमिति नवपदशय्या ॥45॥

अग्निः सोमः प्रवो वीर्यं हविषां स्वर्बृहस्पतिरिन्द्राबृहस्पती ।

अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं

प्रेत्युदात्तं व इत्यनुदात्तं वीर्यं नीचस्वरितम् ॥46॥

हविषां मध्योदात्तं स्वरिति स्वरितम् ।

बृहस्पतिरिति द्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम् ॥47॥

| अन्तोदात्तम् | आद्युदात्तम् | उदात्तम् | अनुदात्तम् | नीचस्वरितम् | मध्योदात्तम् | स्वरितम् | द्युदात्तम् | त्र्युदात्तम् |
|---|---|---|---|---|---|---|---|---|
| अग्निः | सोमः | प्र | वः | वीर्यं | हविषां | स्वः | बृहस्पतिः | इन्द्राबृहस्पती |

**चाषः – वायसः – शिखी – नकुलः – 4 examples to understand mātrā-bheda.**

चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः।

शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ॥49॥

| मात्राम् – चाषः | द्विमात्रम् – वायसः | त्रिमात्रम् – शिखी | अर्धमात्रकम् – नकुलः |
|---|---|---|---|
|  |  |  |  |

### (3) वर्णानाम् अष्टौ स्थानानि

अष्टौ स्थानानि वर्णानाम्+उरः कण्ठः शिरः तथा ।

जिह्वामूलं च दन्ताः च नासिकोष्ठौ च तालु च ॥13॥

→ 1) उरः, 2) कण्ठः, 3) शिरः, 4) जिह्वामूलम्, 5) दन्ताः, 6) नासिका, 7) ओष्ठौ, 8) तालुः ।

तेषाम् विवरणम् यथा—

कण्ठ्यौ अहौ इचुयशास्तालव्या ओष्ठजौ उपू ।

स्युः मूर्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः ॥ 17॥

जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः ।

एऐ तु कण्ठतालव्या ओऔ तु कण्ठोष्ठजौ स्मृतौ ॥ 18॥

*Figure 1. Places of Articulation of Sanskrit syllables*




| | |
|---|---|
| कण्ठ्यौ | अ, ह् |
| तालव्याः | इ, चु, य्, श् (चु = च्, छ्, ज्, झ्, ञ्) |
| औष्ठजौ | उ, पु (पु = प्, फ्, ब्, भ्, म्) |
| मूर्धन्याः | ऋ, टु, र्, ष् (टु = ट्, ठ्, ड्, ढ्, ण्) |
| दन्त्याः | ऌ, तु, ल्, स् (तु = त्, थ्, द्, ध्, न्) |
| जिह्वामूल | कु (कु = क्, ख्, ग्, घ्, ङ्) |
| दन्त्योष्ठ्यः | व् |
| कण्ठतालव्यौ | ए, ऐ |
| कण्ठोष्ठजौ | ओ, औ |

अनुस्वार-यमानां च नासिका स्थानमुच्यते ।

उपध्मानीय ऊष्मा च जिह्वामूलीय नासिके ।

अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥ 22॥

- ✓ अनुस्वारः, यमाः → नासिका स्थानम्
- ✓ अयोगवाहाः → आश्रय स्थान भागिनः ।
    - ○ यद् अयुक्ता वहन्ति अनुपदिष्टाः च श्रूयन्ते, इति अयोगवाहाः ।
    - ○ अनुस्वारः, यमाः, ऊष्मा (विसर्गः), उपध्मौ जिह्वामूलीयौ

तत्र, ओष्मणः गतिः अष्टधा भवति, यथा—

ओभावश्च विवृत्तिश्च शषसा रेफ एव च ।

जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥14॥

✓ 1)ओभावः 2)विवृत्तिः 3)श 4)ष 5)स 6)र 7)जिह्वामूलम् 8)उपध्मा

पुनस्तत्र—

यदि+ओभाव प्रसन्धानम् उकारादिपरं पदम् ।

स्वरान्तं तादृशं विद्याद् अन्यद् व्यक्तम् ऊष्मणः ॥ 15॥

✓ ओभावः + उकारादि → ऊष्मणः स्वरान्तम्

हकारस्य औरस्यम्—

हकारं पञ्चमैः युक्तम् अन्तस्थाभिश्च संयुतम् ।

औरस्यं तं विजानीयात्कठ्यमाहुरसंयुतम् ॥ 16॥

✓ ङ्/ञ्/ण्/न्/म्/ य्/व्/र्/ल्/ संयुतम् ह् → औरस्यम् (उरः)

✓ असंयुतम् ह् → कण्ठ्यम्

तत्र, एचाम् (एओङ् + ऐऔच्) उच्चारणविधिः —

अर्धमात्रा तु कण्ठ्यस्य एकारौकारयोर्भवेत् ।

ऐकारौकारयोः मात्रा तयोः विवृतसंवृतम् ॥ 19॥

✓ ए / ओ = अ+इ/उ → ½ मात्र 'अ' + 1 ½ मात्र 'इ/उ'

✓ ऐ / औ = आ+इ/उ → 1 मात्र 'आ' + 1 मात्र 'इ/उ'

✓ ऐ, औ = आ + इ/उ → विवृत 'आ' + संवृत 'इ/उ'

केचन अन्याः प्रयत्न-विशेषाः—

संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् ।

घोषा वा संवृताः सर्वे अघोषा विवृतः स्मृताः ॥ 20॥

✓ संवृतम् → 1 मात्रिकम्, (सर्वे घोषाः)

✓ विवृतम् → 2 मात्रिकम् (सर्वे अघोषाः)

स्वराणाम् ऊष्मणां चैव विवृतं करणं स्मृतम् ।

तेभ्योऽपि विवृतौ एङौ ताभ्याम् ऐचौ तथैव च ॥ 21॥

✓ स्वराः, ऊष्माः → विवृतम्

✓ एङौ (एओङ्) → अधिकतरौ विवृतौ ।

✓ ऐचौ (ऐऔच्) → अधिकतमौ विवृतौ ।

**(4) & (5) प्रयत्नम् & अनुप्रदानम् ।**

- ✓ प्रयत्नम् = अभ्यन्तर प्रयत्नम्
  - ○ स्पृष्टम्, ईषत्स्पृष्टम्, (ईषत्विवृतम्,) विवृतम्, संवृतम्
- ✓ अनुप्रदानम् = बाह्य प्रयत्नम्
  - ○ विवार, संवार, श्वास, नाद, घोष, अघोष, अल्पप्राण, महाप्राण, (उदात्त, अनुदात्त, स्वरित)

वर्णानां प्रयत्नं वा अनुप्रदानं यथा—

अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः।

शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥38॥

ञमोनुनासिका नह्रो नादिनो हझषः स्मृताः।

ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः ॥39॥

ईषच्छ्वासांश्चरो विद्याद्गोर्धमैतत्प्रचक्षते । 40a॥

- ✓ अचः – अस्पृष्टाः
- ✓ यणः – ईषत्
- ✓ शलः – नेमस्पृष्टाः
- ✓ शेषाः हलः – स्पृष्टाः
- ✓ ञमः - अनुनासिकाः , न ह्रः
- ✓ झषः - नादाः
- ✓ यणः , जशः- ईषत् नादाः
- ✓ खफछठथाः - श्वासाः
- ✓ चरः - ईषत् श्वासाः

*Table 4. Two types of effort - ābhyantara & bāhya prayatna in Pāṇinīya Śikṣa*

| अभ्यन्तर प्रयत्नम् | बाह्य प्रयत्नम् |
|---|---|
| ○ स्पर्शाः → स्पृष्टम्<br>○ अन्तःस्थाः → ईषत् स्पृष्टम्<br>○ ऊष्माः → ईषत् विवृतम्<br>○ स्वराः → विवृतम् | ○ खर्, यमौ(1,2), :क्/ख्, :प्/फ्, : → विवारः, श्वासः, अघोषः<br>(खर्= खफछठथचटतव्+कपय्+शषसर्)<br>○ हश् = यमौ(3,4) → संवारः, नादः, घोषः<br>(हश् = हयवरट्+लङ्+ञमङणनम्+झभञ्+घढधष्+जबगडदश्)<br>○ कचटतप, गजडदब, ङञणनम, यरलव → अल्पप्राणाः |

| | |
|---|---|
| ○ 'अ' → प्रयोगे संवृतम् । प्रक्रिया दशायां तु विवृतम् । | ○ खछठथफ, घझढधभ, शषसह → महाप्राणाः<br>○ स्वराः → उदात्तः, अनुदात्तः, स्वरितः |

The below picture (Figure 2. Classification of Saṁskr̥ta-varṇās according to Pāṇinīya Śikśā) summarizes the five divisions and subdivisions of 64 varṇās.

*Figure 2. Classification of Saṁskr̥ta-varṇās according to Pāṇinīya Śikśā*

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | अल्पप्राणाः | महाप्राणाः | अल्पप्राणाः | महाप्राणाः | अल्पप्राणाः | अल्पप्राणाः | महाप्राणाः | |
| | | | | | विवाराः, श्वासाः, अघोषाः | | संवाराः, नादाः, घोषाः | | | | | विवाराः, श्वासाः, अघोषाः |
| | | | | | | | | | नासिक्याः | अन्तःस्थाः → ईषत्स्पृष्टम् | ऊष्माः → ईषत्विवृतम् | |
| | | | स्वराः (21) → विवृतम् | | स्पर्शाः (25) → स्पृष्टम् | | | | | यादयः (8) | | |
| कण्ठ्याः | | | "अ" आ अ३ | | क् | ख् | ग् | घ् | ङ् | | ह् | |
| तालव्याः | | | इ ई इ३ | | च् | छ् | ज् | झ् | ञ् | य् | | श् |
| मूर्धन्याः | | | ऋ ॠ ऋ३ | | ट् | ठ् | ड् | ढ् | ण् | र् | | ष् |
| दन्त्याः | | | ऌ | | त् | थ् | द् | ध् | न् | ल् | | स् |
| ओष्ठ्याः | | | उ ऊ उ३ | | प् | फ् | ब् | भ् | म् | | | |
| कण्ठतालव्यौ | | | ए ए३ ऐ ऐ३ | | | | | | | | | |
| कण्ठोष्ठ्यौ | | | ओ ओ३ औ औ३ | | | | | | | | | |
| दन्तोष्ठ्यः | | | | | | | | | | व् | | |
| दन्त्याः | दुःस्पृष्टः (1) | | | ऌ३ | | | | | | | | |
| जिह्वमूलीयौ (1) | | अयोगवाहाः | | | :क् | :ख् | | | | | | |
| ओष्ठ्याः | उपध्मानीयौ(1) | | | | :प् | :फ् | | | | | | |
| यमाः (4) | | | | | (1/2/3/4)+यमाः+5th | | | | यमाः | | | |
| अनुस्वारम् (1) | | | | | | | | | अं | | | |
| विसर्गः (1) | | | | अः | | | | | | | | |
| 63 वर्णाः = 21 स्वराः + 25 स्पर्शाः + 8 यादयः + 4 यमाः + 1 अनुस्वारः + 1 विसर्गः + 1 :क् + 1 :प् + 1 दुःस्पृष्ट् (ऌ३) | | | | | | | | | | | | |

## पाठकानां गुणाश्च दोषाश्च ।

गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।

अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥32॥

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।

धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥33॥

Pāṇinīya Śikṣā describes 6-qualities and 6-faults while reciting the Veda-mantrās. Thus, a correct rendering of mantras with a good knowledge of śikṣā śāstra, will create the harmony among sṭhulā, sūkṣma and kāraṇa śarīrās, and helps to realize the self.

| **पाठकाधमाः** | **पाठका गुणाः** |
|---|---|
| 1. गीती | 1. माधुर्यम् |
| 2. शीघ्री | 2. अक्षरव्यक्तिः |
| 3. शिरःकम्पी | 3. पदच्छेदः |
| 4. लिखितपाठकः | 4. सुस्वरः। |
| 5. अनर्थज्ञः | 5. धैर्यम् |
| 6. अल्पकण्ठः | 6. लयसमर्थम् |

### 2.1.2 छन्दः पादौ तु वेदस्य ।

चदि आह्लादे दीप्तौ च । छन्दयति असुन् । छन्दयति = अह्लादयति, इति छन्दः । छन्द्यते अनेन वा इति छन्दः । छन्दयति = पृणाति रुचते इति छन्दः । छन्दयति मन्त्रप्रतिपादित यज्ञादीन् इति छन्दः । मनोमयकोशे सन् छन्दः प्राणमयकोशं छन्दयति इति वा प्राणमयकोशः छन्द्यते मनोमयात्मकेन छन्दसा वा इति ।

प्रज्ञानं ब्रह्मेति ऐतरेयोपनिषत् (3.3) ।

आनन्दो ब्रह्मेति तैत्तिरीयोपनिषत् (3.6) ।

तथा अह्लादकरश्च प्रदीपकश्च छन्दः आत्मसाक्षात्कार-योजकः वेदाङ्गेषु प्रधानः ।

आध्यात्मिकाह्लादः पद्यते अनेन इति पादः । पद्ऌ गतौ । अत एव छन्दः पादौ तु वेदस्य इति उच्यते । अस्मिन्नर्थे, गरुड एव छन्द इत्यभिप्रायः भागवतपुराणे दृश्यते, यथा—

- छन्दोमयेन गरुडेन समूह्यमानः चक्रायुधो ऽभ्यगमदाशु यतो गजेन्द्रः । भागवतपुराणम् 8.3.31 ।
- गरुडो भगवान् स्तोत्र स्तोभः छन्दोमयः प्रभुः । भागवतपुराणम् 6.8.29 ।

पुनः गायत्र्यादि सप्तछन्दांसि सूर्यस्य सप्त रश्मय इत्यपि व्याख्यातं यथा—

- छन्दांसि वै व्रजो गोस्थानः । इति तैत्तिरीय-ब्राह्मणम् 3.2.9.3 ॥
- हयाश्च सप्त छन्दांसि गायत्र्यादीनि सुव्रत । अग्निपुराणम् 120.026॥

**सप्ताऽस्यासन् परिधयः ।**

छन्दसाम् आविर्भावः कथम्? पुरुषसूक्ते ब्रह्मयज्ञात् छन्दसाम् आविर्भावमुच्यते यथा—

तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।

छन्दाँसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत । ऋक् 10.90.9॥

भागवतपुराणे पुरुषस्य सप्तधातुभ्यः छन्दसाम् उत्पत्तिः वर्णितं यथा,

छन्दसां सप्तधातवः । 2.6.1॥

छन्दांसि साक्षात् तत्र सप्त धातवः । 8.7.28॥

छन्दांसि अनन्तस्य शिरो गृणन्ति । 2.1.31॥

इत्येवं हठयोगविषये मूलाधारादि सप्तचक्रा अपि वर्णिताः । अत्र गायत्र्यादि सप्त छन्दसां तत्त्वार्थ दर्शनं च, पतञ्जलिनोक्तानां सप्त-योग-भूमिकानां च (तस्य सप्तधा प्रान्तभूमिः प्रज्ञा । इति योगसूत्रम् 2.27) सारूप्यं यथा—

1. गायन्तम् त्रायते इति सा गायत्री । त्रैञ् पालने । Protects its reciter.
2. ओषति अकार्यम् (अविद्यादि क्लेशान्) इति उष्णाः । उष दाहे । उष्णत्वात् उष्णिक् । Burns the kleśas of the reciter.
3. आध्यात्मिकमनुसृत्य विषयात्मकं (व्याध्यादि विक्षेपसहितं चित्तं) स्तोभते इति अनुष्टुप् । ष्टुभ् स्तम्भे । Removes the citta vikṣepās.
4. आध्यात्मिकाह्लादः बृहति इति बृहती । बृह वृद्धौ । Accelerates the practice towards realization.
5. आध्यात्मिकाह्लादः पञ्चते इति पङ्क्तिः । पचि विस्तारे । Expands the bliss of the reciter.
6. स्थूल सूक्ष्म कारण रूपाणि इति त्रीणि शरीराणि स्तोभते इति त्रिष्टुप् । ष्टुभ् स्तम्भे । Removes the bondage with all three śarīrās (sthūla, sūkṣma and kāraṇa)
7. अनात्मा जायते इति जः । तथाऽपि सः तस्य आध्यात्मिकस्य उपमानतया गच्छति इति जगती । जनी प्रादुर्भावे । गमॢ गतौ । Takes the reciter beyond the clutches of jagat (prakṛti).

## गायत्र्यादीनां देवतादि तत्त्व-विशेषाः

- अग्निः सविता सोमो बृहस्पतिर्मित्रावरुणाविन्द्रो विश्वेदेवा देवताः । छन्दस्सूत्रम् 3.63 ।
- स्वराः षड्ज ऋषभ गान्धार मध्यम पञ्चम धैवत निषादाः । छन्दस्सूत्रम् 3.64 ।
- सित सारङ्ग पिशङ्ग कृष्ण नील लोहित गौरा वर्णाः । छन्दस्सूत्रम् 3.65 ।
- आग्निवेश्य काश्यप गौतमांगिरस भार्गव कौशिक वासिष्ठानि गोत्राणि । छन्दस्सूत्रम् 3.66 ।

*Table 5. Devatā, svara, varṇa and gotra details in Chandas.*

| छन्दसि देवतादि विशेषाः | | | | | |
|---|---|---|---|---|---|
| छन्दः | वर्ण सङ्ख्या | देवताः | स्वराः | वर्णाः | गोत्रम् |
| गायत्री | 24 (= 8*3) | अग्निः | षड्ज | सित | अग्निवेश्यः |
| उष्णिक् | 28 (= 8*2 +12) | सविता | ऋषभ | सारङ्ग | काश्यपः |
| अनुष्टुप् | 32 (= 8*4) | सोमः | गान्धार | पिशङ्ग | गौतमः |
| बृहती | 36 (= 8*3+12) | बृहस्पतिः | मध्यम | कृष्ण | अङ्गिरसः |
| पङ्क्ति | 40 (= 8*5) | मित्रावरुणौ | पञ्चम | नील | भार्गवः |

| | | | | | |
|---|---|---|---|---|---|
| त्रिष्टुप् | 44 (= 8*4+12) | इन्द्रः | धैवत | लोहित | कौशिकः |
| जगती | 48 (12*4) | विश्वेदेवाः | निषाद | गौर | वासिष्ठः |

Thus, the śāstra explains the list of chandas and the number of syllables in each of them, their adhi-devatā, svara, varṇa and gotram. Each of these represent a tattva and reciting a specific chandas invokes a devatā and that bhāvanā is achieved. Thus, chandas is essential in reciting the vedic mantras and invokes the bliss within.

#### 2.1.2.1 छन्दोभिः व्याहृत्युपासनम् ।

भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः, इति तैत्तिरीयपनिषदि शीक्षावल्ली – पञ्चमानुवाकः । तथा छन्दोभिः व्याहृत्युपासनं यथा—

- पृथिवी गायत्री । अन्तरिक्षं त्रिष्टुभम् । द्यौर्जगती ।
- अग्निर्गायत्री । इन्द्रस्त्रैष्टुभः । विश्वेदेवा जागताः ।
- तेजो वै ब्रह्मवर्चसं गायत्रम् । ओजो वा इन्द्रियं वीर्यं त्रिष्टुप् । पशवो जागताः ।
- ब्रह्म गायत्रम् । क्षत्रं त्रैष्टुभम् । विड् जागतम् ।
- ब्राह्मणो गायत्रः । क्षत्रियस्त्रैष्टुभः । वैश्यो जागतः ।
- चतुर्विंशत्यक्षरा वाग्गायत्री । चतुश्चत्वारिंशदक्षरा वाक् त्रिष्टुभी । अष्टचत्वारिंशदक्षरा वाग् जागती ।

इत्येवम् अनेकधा लक्षण्याः श्रूयन्ते । (छन्दसूत्रस्य छन्दोनिरुक्ति व्याख्यानम्, मधुसूदनः) ॥

अर्थात्, गायत्र्या छन्दसा ब्राह्मणम्, त्रिष्टुभा राजन्यम्, जगत्या वैश्यम् असृजत् । तथैव गायत्र्या पृथिवीं च, त्रिष्टुभा अन्तरिक्षं च, जगत्या द्यौश्च असृजत् । पुनः गायत्र्या अग्निं च, त्रिष्टुभा वायुं च, जगत्या सूर्यं च असृजत् । तथैव ऋग्वेदे पुरुषसूक्तेऽपि सृष्टिक्रमवर्णनं यथा—

ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः । पद्भ्यागं शूद्रो अजायत ॥ (ऋक् 10.90.12)
चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायतः ।
मुखादिन्द्रश्च अग्निश्च । प्राणाद्वायुरजायत ॥ (ऋक् 10.90.13)
नाभ्या आसीदन्तरिक्षम् । शीर्षो द्यौ समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकागं अकल्पयन् ॥ (ऋक् 10.90.14)

**अक्षरेण मिमते सप्तवाणीः ।**

अक्षरेण मिमते सप्तवाणीः । इति ऋक् 1.164.24 ॥ छन्दोहीनो न शब्दोऽस्ति न छन्दश्शब्दवर्जितम् इति नाट्यशास्त्रम् 14.47॥ चत्वारि वाव शतसहस्राणि द्वात्रिंशच्चाक्षर सहस्राणि (4,32,000), इत्येवम् अक्षरसङ्ख्या स्मर्यते । (छन्दसूत्रस्य छन्दोनिरुक्ति व्याख्यानम्, मधुसूदनः) ॥ तथा यदक्षरपरिमाणं तच्छन्दः । मात्राक्षरसङ्ख्यानियता वाक् छन्दः । अत्र आपस्तम्बश्रौतसूत्रेषु, छन्दोभिः अनुष्ठानविधानमपि सूचितम् यथा—

i. मा छन्दः, तत्पृथिवी, अग्निर्देवता ।
ii. प्रमा छन्दः तदन्तरिक्षं, वातो देवता ।
iii. प्रतिमा छन्दः तद् द्यौः, सूर्यो देवता ।
iv. अस्रीविः छन्दः, तद् दिशः, सोमो देवता ।
v. विराट् छन्दः, तद् वाग्, वरुणो देवता ।
vi. गायत्री छन्दः, तद् अजा, बृहस्पतिर्देवता ।
vii. त्रिष्टुप् छन्दः, तद् हिरण्यम्, इन्द्रो देवता ।
viii. जगती छन्दः, तद् गौः प्रजापतिर्देवता ।
ix. अनुष्टुप् छन्दः, तद् वायुः, मित्रो देवता ।
x. उष्णिहा छन्दः, तत् चक्षुः, पूषा देवता ।
xi. पङ्क्तिः छन्दः, तत् कृषिः, पर्जन्यो देवता ।
xii. बृहती छन्दः, तद् अश्वः, परमेष्ठी देवता । (इति आपस्तम्बश्रौत सूत्रम् 16.28.1) ॥

तथा कैवल्यसाधने छन्दोभिः व्याहृत्युपासनप्राशस्त्यं दर्शितम् अस्मिन् ऋग्वेद मन्त्रेऽपि—

यद् गायत्रे अधि गायत्रमाहितं त्रैष्टुभाद् वा त्रैष्टुभं निरतक्षत ।
यद् वा जगज्जगत्याहितं पदं य इत् तद् विदुस्ते अमृतत्वमानशुः ॥ऋक् 1.164.23॥

**2.1.2.2 पिङ्गलस्य छन्दस्सूत्रम् ।**

अस्मिन् छन्दश्शास्त्रे अक्षर-लघु-गुरु-मात्रा-गण-वृत्तादयः पारिभाषिकाः स्मर्यन्ते । तेषां विषये तत्त्वार्थ दर्शनं निरुपितम् अत्र—

**अक्षरः / वर्णः –** न क्षरति इति, ग्राह्यम् अनेन तं गृह्यते इति अक्षरः । क्षर सञ्चलने । आध्यात्मिक स्थितये वर्ण्यते, आध्यात्मिकस्थितं वर्णयतीति च वर्णम् । वर्ण स्तुतौ । त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः । प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ॥ इति पाणिनीय शिक्षा 3 ॥

**मात्रा –** आध्यात्मिकाह्लादः मीयते अनेन इति मात्रा । चाषस्तु वदते मात्रां द्विमात्रं त्वेव वायसः। शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ॥ इति पाणिनीय शिक्षा 49॥

**लघु & गुरु**

- आध्यात्मिकः अनेन लङ्घ्यते, इति लघुः । आध्यात्मिकं प्रति लङ्घति च, इति लघुः । लघि गतौ ।
- सर्वार्थान् गृणाति इति गुरुः । गॄ शब्दे ।

**गणाः**

गण्यते आध्यात्मिकाह्लादः अनेन इति गणः । गण सङ्ख्याने । यथा गुणत्रयी प्रकृतिः, तथा वर्णत्रयी गणः । अत्र म-य-र-स-त-ज-भ-न इत्यष्टगणाः अष्टप्रकृतीः सूचयन्ति, यथा—

मयरसतजभन सञ्ज्ञाश्छन्दस्याष्टौ गणास्त्रिवर्णाः स्युः ।
भूम्यम्बुवह्निवायुव्योमार्कसुधांशुनाकदेवास्ते ॥ (छन्दःकौस्तुभम्)

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ भगवद्गीता 7.4 ॥

पुनस्तत्रैतेषां प्रकृतीनां ग्रहाधिपत्यं यथा ज्योतिषशास्त्रे पराशरेनोक्तम्—

सर्वात्मा च दिवानाथो मनः कुमुदबान्धवः । बृहत्पराशरहोराशास्त्रम् 3.12॥
अग्निभूमिनभस्तोयवायवः क्रमतो द्विज ।
भौमादीनां ग्रहाणां च तत्वानीति यथाक्रमम् ॥ बृहत्पराशरहोराशास्त्रम् 3.20॥

**वृत्तम् । सममर्थसमं विषमं च ।**

इति पिङ्गलसूत्रम् 5.2 ॥ वर्तते इति वृत्तम् । छन्दोमयं ब्रह्म इति भागवतपुराणम् 10.80.45॥ तस्य चत्वारि पादाः वर्णितं यथा, सोऽयमात्मा चतुष्पात् । इति माण्डूक्योपनिषद् 2॥

- सह मान्ति वर्तन्ते इति समः । माङ् माने वर्तने च । चत्वारि पादेषु अभेदभावेन वर्तते सति समवृत्तम्, यथा— अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत । इति माण्डूक्योपनिषद् 12 ॥
- अर्थति भेदं गच्छतीति अर्थः । अर्थ गतौ । जागरितस्थानो वैश्वानरोऽकारः । स्वप्नस्थानस्तैजस उकारः । सुषुप्तस्थानः प्राज्ञो मकारः । इति माण्डूक्योपनिषद् 9, 10, 11) । तदा जागरित-स्वप्न-सुषुप्त-स्थानयोः भेदभावेन गच्छति सति अर्थसमवृत्तम् ।

- वेवेष्टि प्रकृतिभावेन इति विषम् । विषॢ व्याप्तौ । तस्य प्रेरणं विषमम् । यथा मोहावरणेन प्रकृतिभावेन गच्छति सति विषमवृत्तम् । वृत्तिसारूप्यमितरत्र इति योगसूत्रम् 1.4॥

**प्रथमाध्याये, गणविभाजनम् ।**

1.1 धीश्रीस्त्री (म्) । 1.2 वरा सा (य्) । 1.3 का गुहा (र्) । 1.4 वसुधा (स्) । 1.5 सा ते क्व (त्) । 1.6 कदा स (ज्) । 1.7 किं वद (भ्) । 1.8 न हस (न्) । 1.9 गृ (ल्) । 1.10 ग् अन्ते । 1.11 ध्रादि परः । 1.12 हे । 1.13 लौसः । 1.14 ग्लौ । 1.15 अष्टौ वसव इति ॥

*Table 6. Tattva, Graha and Rasa details in 8-gaṇās*

| गणेषु तत्त्वादि विशेषाः | | | | | | |
|---|---|---|---|---|---|---|
| पिङ्गल-सूत्रम् | द्व्यंशमानः (1-ल, 0-गु) | गणम् | निरुकतम् | तत्त्व-विशेषः | ग्रह-विशेषः | रस- विशेषः |
| धीश्रीस्त्री (म्) | 0-0-0 (0) | म् | मा माने । माति । | पृथ्वी | बुधः | रौद्रम् |
| वरा सा (य्) | 1-0-0 (1) | य् | या प्रापणे । याति । | आपः | शुक्रः | करुणा |
| का गुहा (र्) | 0-1-0 (2) | र् | रै शब्दे । रायति । | अग्निः | कुजः | शृङ्गारः |
| वसुधा (स्) | 1-1-0 (3) | स् | षै क्षये । सायति ।<br>षो अन्तकर्मणि । स्यति । | वायुः | शनिः | भयानकम् |
| सा ते क्व (त्) | 0-0-1 (4) | त् | तनु विस्तरे । तनोति ।<br>तनु श्रद्धोपर्करणयोः ।<br>तानयति । | आकाशः | गुरुः | शान्तः |
| कदा स (ज्) | 1-0-1 (5) | ज् | जन जनने । जायते । | सूर्यः | सूर्यः | वीरः |
| किं वद (भ्) | 0-1-1 (6) | भ् | भा दीप्तौ । भाति । | चन्द्रः | चन्द्रः | हास्यम् |
| न हस (न्) | 1-1-1 (7) | न् | अव्ययम् | आत्मा | ईश्वरः | अद्भुतम् |

*Figure 3. Graphical representation of 8-gaṇās*




## द्वितीयाध्याये छन्दोभेदाः ।

2.1 छन्दः । 2.2 गायत्री । 2.3 दैव्येकम् । 2.4 आसुरी पञ्चदश । 2.5 प्राजापत्याष्टौ । 2.6 यजुषां षट् । 2.7 साम्नां द्विः । 2.8 ऋचां त्रिः । 2.9 द्वौ द्वौ साम्नां वर्धेत । 2.10 त्रींस्त्रीनृचाम् । 2.11 चतुरश्चतुरः प्राजापत्यायाः । 2.12 एकैकं शेषे । 2.13 जह्यादासुरी । 2.14 तान्युष्णिगनुष्टुब्बृहती पंक्ति त्रिष्टुब्जगत्यः । 2.15 तिस्रस्तिस्रस्सनाम्न्य एकैका ब्राह्म्यः । 2.16 प्राग्यजुषामार्ष्य इति ॥

*Table 7. Number of syllables in each Chandas and the Chandassūtra details.*

| छन्दसि वर्णसङ्ख्या विशेषाः | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| छन्दांसि | सूत्रम् | गायत्री | उष्णिग् | अनुष्टुब् | बृहती | पङ्क्ति | त्रिष्टुब् | जगती | सूत्राङ्कः |
| दैवी | 1 (+1) | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 2/ 3,12 |
| आसुरी | 15 (-1) | 15 | 14 | 13 | 12 | 11 | 10 | 9 | 2/ 4,13 |
| प्राजापत्य | 8 (+4) | 8 | 12 | 16 | 20 | 24 | 28 | 32 | 2/ 5,11 |
| यजुः | 6 (+1) | 6 | 7 | 8 | 9 | 10 | 11 | 12 | 2/ 6,12 |
| साम | 2 x यजुः | 12 | 14 | 16 | 18 | 20 | 22 | 24 | 2/ 7,9 |
| ऋक् | 3 x यजुः | 18 | 21 | 24 | 27 | 30 | 33 | 36 | 2/ 8,10 |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| ब्राह्मी | यजुः + साम + ऋक् | 36 | 42 | 48 | 54 | 60 | 66 | 72 | 2/ 15 |
| आर्षी | दैवी + आसुरी + प्राजापत्य | 24 | 28 | 32 | 36 | 40 | 44 | 48 | 2/ 16 |

**गायत्र्यादिषु विशेषभेदाः—**

*Table 8. Various types of Gāyatri and other Chandas.*

| छन्दः | वर्णाः x पादाः | विभागः |
|---|---|---|
| गायत्री (8 x 3) | 6 x 4 | गायत्री |
| | 7 x 3 | पादनिचृत् गायत्री |
| | 8 x 3 | अतिपादनिचृत् गायत्री |
| | 9 + 9 + 6 | नागी गायत्री |
| | 6 + 9 + 9 | वाराही गायत्री |
| | 6 + 7 + 8 | वर्धमान गायत्री |
| | 8 + 7 + 6 | प्रतिष्ठा गायत्री |
| विराट् (10) | 12 + 8 | विराट् |
| | 11 + 11 + 11 | त्रिपात् विराट् |
| उष्णिक् (8x2 + 12) | 8 + 8 + 12 | पर उष्णिक् |
| | 8 + 12 + 8 | कुकुप् उष्णिक् |
| | 12 + 8 + 8 | पुर उष्णिक् |
| | 7 x 4 | उष्णिक् |
| अनुष्टुप् (8 x 4) | 8 x 4 | अनुष्टुप् |
| | 12 + 12 + 8 | त्रिपात् अनुष्टुप् |
| | 12 + 8 + 12 | त्रिपात् अनुष्टुप् |
| बृहती (8x3 + 12) | 8 + 8 + 12 + 8 | पथ्या बृहती |
| | 8 + 12 + 8 + 8 | न्यङ्कुसारिणी / स्कन्धोग्रीवी / उरो बृहती |

| | | |
|---|---|---|
| | 8 + 8 + 8 + 12 | उपरिष्टात् बृहती |
| | 12 + 8 + 8 + 8 | पुरस्तात् बृहती |
| | 9 + 9 + 9 + 9 | बृहती (क्वचित्) |
| | 10 + 10 + 8 + 8 | |
| | 12 + 12 + 12 | महा बृहती / सतो बृहती |
| पङ्क्तिः (8 x 5) | 12 + 12 + 8 + 8 | प्रस्तार पङ्क्तिः |
| | 12 + 8 + 12 + 8 | सतः पङ्क्तिः |
| | 8 + 12 + 8 + 12 | |
| | 8 + 8 + 12 + 12 | आस्तार पङ्क्तिः |
| | 8 + 12 + 12 + 8 | विष्टार पङ्क्तिः |
| | 5 x 4 | अक्षर पङ्क्तिः |
| | 5 x 2 | अल्पशः पङ्क्तिः |
| | 5 x 5 | पद पङ्क्तिः |
| | 4 + 6 + 5 + 5 + 5 | |
| | 8 x 5 | पथ्या पङ्क्तिः |
| | 8 x 6 | जगती पङ्क्तिः |
| त्रिष्टुप् (11 x 4) | 11 + 8 + 8 + 8 + 8 | त्रिष्टुप् ज्योतिष्मती (पुरस्ताद् ज्योतिः) |
| | 12 + 8 + 8 + 8 + 8 | जगती ज्योतिष्मती |
| | 8 + 8 + 11 + 8 + 8 | मध्ये ज्योतिः |
| | 8 + 8 + 8 + 8 + 11 | उपरिष्टाद् ज्योतिः |

**अन्ये केचन छन्दोभेदाश्च वर्णसङ्ख्याश्च ।**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 24 | गायत्री | 28 | उष्णिक् | 32 | अनुष्टुप् | 36 | बृहती |
| 40 | पङ्क्तिः | 44 | त्रिष्टुप् | 48 | जगती | 52 | अतिजगती |
| 56 | शक्करी | 60 | अतिशक्करी | 64 | अष्टिः | 68 | अत्यष्टिः |

| | | | |
|---|---|---|---|
| 72 धृतिः | 76 अतिधृतिः | 80 कृतिः | 84 प्रकृतिः |
| 88 आकृतिः | 92 विकृतिः | 96 सङ्कृतिः | 100 अभिकृतिः |
| 104 उत्कृतिः | 108+ दण्डकः | | |

**उपसंहारः**

माया मनः सृजति कर्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः।

छन्दोमयं यदजयार्पितषोडशारं संसारचक्रमज कोऽतितरेत्त्वदन्यः ॥ भागवतपुराणम् 7.9.21॥

अस्य दुस्तरस्य छन्दोमयस्य संसारचक्रस्य षोडशाराः प्रश्नोपनिषदि वर्णिताः यथा,

स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनः ।

अन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु च नाम च ॥ प्रश्नोपनिषद् 6.4 ॥

अरा इव रथनाभौ कला यस्मिन्प्रतिष्ठिताः ।

तं वेद्यं पुरुषं वेद यथ मा वो मृत्युः परिव्यथा इति ॥ प्रश्नोपनिषद् 6.6 ॥

तथा छन्दोमयस्य पुरुषस्य षोडशकलान् ज्ञात्वा, चित्तवृत्तीनां निरोधे सति असम्प्रज्ञातसमाधिः सिद्ध्यते ।

मार्गन्ति यत्ते मुखपद्मनीडैः छन्दः सुपर्णैः ऋषयो विविक्ते । (3.5.40),

इत्यपि छन्दोभिः आत्मसाक्षात्कारमार्गं सूच्यते भागवत-पुराणे ।

### 2.1.2.3 रुद्रानुवाकेषु छन्दो-ऋषि-देवतादि विशेषाः

**प्रथमानुवकाम् ।**

| #.# | ऋषिः | देवता | छन्दः | कृतम् | ध्यानश्लोकम् |
|---|---|---|---|---|---|
| 1.1 | कश्यपः | रुद्रः | अनुष्टुप् | प्रत्यक्षम् | आकर्णकृष्टे धनुषि ज्वलन्तीं<br>देवीमिषुं भास्वति सन्दधानम् ।<br>ध्यायेन्महेशं महनीयवेषं<br>देव्या युतं योधतनुं युवानम् ॥ |
| 1.2 | आत्रेयः | शम्भुः | अनुष्टुप् | प्रत्यक्षम् | ध्यायेद्देवं सस्मितं स्यन्दनस्थं<br>देव्या सार्धं तेजसा दीप्यमानम् ।<br>इष्विष्वासालन्कृताभ्यां भुजाभ्यां<br>शूराकारं स्तूयमानं सुरौघैः ॥ |

<table>
<tr><td>1.3</td><td>काश्यपः</td><td>शम्भुः</td><td>स्वराट्-<br>अनुष्टुप्<br>(?बृहती)</td><td>प्रत्यक्षम्</td><td>स्मेराननं चन्द्रकलावतंसं<br>गंगाधरं शैलसुतासहायम् ।<br>त्रिलोचनं भस्मभुजंगभूषणं<br>ध्यायेत्पशूनां पतिमीशितारम् ॥</td></tr>
<tr><td>1.4</td><td rowspan="2">गौतमः<br>(? गोधूमः)</td><td rowspan="2">रुद्रः</td><td>निचृत्-<br>अनुष्टुप्</td><td>प्रत्यक्षम्</td><td rowspan="2">सांग्रामिकेन वपुषा प्रविराजमानं<br>देवं पुरत्रयविनाशनमन्दहासम् ।<br>दैत्यान् दिधक्षुमचलेश्वरचापपाणिं<br>ध्यायेत्पुरारिमथ भूमिरथाधिरूढम् ॥</td></tr>
<tr><td>1.5</td><td>अनुष्टुप्<br>(?निचृत्)</td><td>प्रत्यक्षम्</td></tr>
<tr><td>1.6</td><td>कण्वः</td><td>शम्भुः</td><td>अनुष्टुप्<br>(?निचृत्)</td><td>परोक्षम्</td><td>चन्द्रार्धमौलिं कालारिं व्यालयज्ञोपवीतिनम् ।<br>ज्वलत्पावकसंकाशं ध्यायेद्देवं त्रिलोचनम् ॥</td></tr>
<tr><td>1.7</td><td rowspan="2">कालः<br>(?मरुत्वानि)</td><td rowspan="2">आदित्यात्मा<br>रुद्रः</td><td>आस्तार-<br>पङ्क्तिः</td><td>परोक्षम्</td><td rowspan="2">मण्डलान्तरगतं हिरण्मयं<br>भ्राजमानवपुषं शुचिस्मितम् ।<br>चण्डदीधिति मखण्डितद्युतिं<br>चिन्तयेन्मुनिसहस्रसेवितम् ॥</td></tr>
<tr><td>1.8</td><td>जगती<br>षट्पदा</td><td>परोक्षम्</td></tr>
<tr><td>1.9</td><td>शम्भुः</td><td>शम्भुः</td><td>अनुष्टुप्</td><td>परोक्षम्</td><td>शरच्चन्द्रप्रकाशेन वपुषा शीतलद्युतिम् ।<br>ध्यायेत्सिंहासिनासीनमुमया सहितं शिवम् ॥</td></tr>
<tr><td>1.10</td><td rowspan="3">नारदः</td><td rowspan="3">रुद्रः</td><td rowspan="3">अनुष्टुप्</td><td>प्रत्यक्षम्</td><td rowspan="3">उद्यद्भास्करकोटिप्रकाशं आदीप्तदहनमूर्धानम् ।<br>भीषणभुजङ्गभूषं ध्यायेद्विविधायुधं रुद्रम् ॥<br>रुद्रं सुरनियन्तारं शूलखट्वाङ्गधारिणम् ।<br>ज्वालामालावृतं ध्यायेत् भक्तानामभयप्रदम् ॥</td></tr>
<tr><td>1.11</td><td>प्रत्यक्षम्</td></tr>
<tr><td>1.12</td><td>परोक्षम्</td></tr>
<tr><td>1.13</td><td rowspan="3">शम्भुः</td><td rowspan="3">शम्भुः</td><td rowspan="3">अनुष्टुप्</td><td>प्रत्यक्षम्</td><td rowspan="3">प्रणमदमरसङ्घमौलिमाला-<br>कुसुमरजोरुणपादपद्मयुग्मम् ।<br>अनवरतमनुस्मरेत्भवान्या सह<br>जगतां पितरं पिनाकपाणिम् ॥</td></tr>
<tr><td>1.14</td><td>प्रत्यक्षम्</td></tr>
<tr><td>1.15</td><td>प्रत्यक्षम्</td></tr>
</table>

**द्वितीयानुवाकम्**

- ऋषिः = मण्डूकः ।
- देवता = रुद्रो ।
- छन्दः = महागायत्री ।
- द्रव्य-विषयम् आधिपत्यं प्रतिपादितम् ।
- ध्यानश्लोकम्—
  मुक्तालंकृतसर्वाङ्गमिन्दुगङ्गाधरं हरम् ।
  ध्यायेत्कल्पतरोर्मूले समासीनं सहोमया ॥

**तृतीयानुवाकम्** ।

- ऋषिः = महादेवः । देवता = महादेवः । छन्दः = बृहती ।
- क्रिया-विषयम् आधिपत्यं प्रतिपादितम् ।
- ध्यानश्लोकम्—
  रूपयौवनसंपन्ना मूर्तेव वनदेवता ।
  पुष्पितानेकपुन्नागसहकारशिशूपमः ॥
  पञ्चविंशतिनक्षत्रमायूरकृतशेखरः ।
  अकलङ्कशरत्पूर्णचन्द्रबिम्बसमाननः ॥
  प्रातर्विबुद्धपद्माभं वसानं चर्म कोमलम् ।
  सव्यापसव्यविधृतकृतमालाविभूषितः ।
  धराकदंबपुञ्जेन नाभिदेशप्रलंबिना ॥
  आजङ्घं प्रेक्षणीयेन प्रेक्षणियोपि शत्रुभिः ॥
  भूधरस्य च चार्वङ्गी कन्यालङ्कारशोभिता ।
  आदर्शमूर्तिः शोभानामन्या नारीव निर्मला ।
  तस्या हस्ते धनुर्दत्वा शरमेकं च निर्मलम् ॥
  तदीयमंसमालंब्याश्लिष्टं वामेन बाहुना ।
  सुगंधिपुष्पस्तबकमाघ्रायाघ्राय पाणिना ॥
  वीज्यमानो मन्दमन्दं पनपल्लवशाखया ।
  समावृतो बालकैश्च श्वभिश्चापि मनोहरैः ॥
  गच्छद्भिरग्रतो दृप्तैः ध्यातव्यो जगतां गुरुः ।
  एवंरूपो महातेजा किरातवपुरीश्वरः ॥

**चतुर्थानुवाकम् ।**

- ऋषिः = दुर्वासः ।
- देवता = शम्भुः ।
- छन्दः = उष्णिक् ।
- प्रत्यक्षकृताः ।
- क्रिया-गुण-द्रव्य-विषयम् आधिपत्यं प्रतिपादितम् ।
- ध्यानश्लोकम्—
  भस्मोद्धूलितसर्वाङ्गं जटामण्डलमण्डितम् ।
  ध्यायेद्देवं वृषारूढं गणेश्वरयुतं हरम् ॥

**पञ्चम षष्टानुवाकौ ।**

- ऋषिः शम्भुः ।

- देवता = शम्भुः ।
- 5) छन्दः = महाविराट् । 6) छन्दः = महापङ्क्तिः ।
- विश्वाधिपत्यं प्रतिपादितम् ।
- परम् अष्टमूर्ति-अधिष्ठान-भेदेन च देवः स्तूयते ।
    - भवः – अपां अधिष्ठाता
    - रुद्रः – सूर्यस्य अधिष्ठाता
    - शर्वः – अग्नेः अधिष्ठाता
    - पशुपतिः – भूमेः अधिष्ठाता
    - उग्रः – यजमानमूर्तेः अधिष्ठाता
    - भीमः – आकशमूर्तेः अधिष्ठाता
- ध्यानश्लोकम्—
  गौरीकराम्बुजन्यस्तस्वर्णशैलशरासनम् ।
  इषुहस्तं रथारूढं नरनारीतनुं स्मरेत् ॥

**सप्तमानुवाकम् ।**

- ऋषिः = हेमकोशः ।
- देवता = रुद्रः ।
- छन्दः = महापङ्क्तिः ।
- ध्यानश्लोकम्—
  जटाभिर्लम्बमानाभिर्नृत्यन्तमभयप्रदम् ।
  देवं शुचिस्मितं ध्यायेद्व्याघ्रचर्मपरिष्कृतम् ॥

**अष्टमानुवाकं च, नवमानुवाके 9.14 पर्यन्तम् ।**

- ऋषिः = रुद्रः ।
- देवता = रुद्रः ।
- छन्दः = अनुष्टुप् ।
- देवस्य अनुग्रह-रूपाणि प्रदर्श्यन्ते ।
- ध्यानश्लोकम्—
  पिनाकपाणिं भूतेशमुद्यत्सूर्यायुतद्युतिम् ।
  भूषितं भुजगैर्ध्यायेत्कण्ठेकालं कपर्दिनम् ॥

**नवमानुवाके 9.15 – 9.19**

- ऋषिः = शम्भुः ।
- देवता = शम्भुः ।

- छन्दः = जगती षट्पदा ।
- प्रत्यक्षकृतः ।
- ध्यानश्लोकम्—
  विश्वतः पाणिपादं तं विश्वतोक्षिशिरोमुखम् ।
  ज्वलन्तं विश्वमावृत्य तेजोराशिं शिवं स्मरेत् ॥

**दशमानुवाकम् ।**

| #.# | ऋषिः | देवता | छन्दः | ध्यानश्लोकम् |
|---|---|---|---|---|
| 10.1 | पुलहः | रुद्रः | आस्तार-पङ्क्तिः | आगुल्फासितकञ्चुको डमरुकाश्लिष्टो लसत्कुण्डली<br>शूली कुण्डलितश्रवाः सतिलको मञ्जुक्कणन्नूपुरः ।<br>श्रीमन्निर्मलदन्तपङत्तिकिरणः श्वेतायमानाननो<br>देवो भैरववेषभूषिततनुर्ध्येयो मृडानीपतिः ॥ |
| 10.2 | स्कन्दः | स्कन्द-रूपी रुद्रः | अनुष्टुप् | द्रुतचामीकरप्रख्यं शक्तिपाणिं षडाननम् ।<br>मयूरवाहनारूढं स्कन्दरूपं शिवं स्मरेत् ॥ |
| 10.3 | माण्डव्यः | रुद्रः | जगती (?अनुष्टुप्) | दिव्यसिम्हासनासीनं स्तूयमानं महर्षिभिः । |
| 10.4 | | | | प्रसन्नवदनं ध्यायेत् सोमं सोमार्धशेखरम् ॥ |
| 10.5 | देवरातः | नन्दीश्वर-रूपो रुद्रः | जगती | बालेन्दुमकुटं देवं तरुणादित्यविग्रहम् ।<br>ध्यायेन्नन्दीश्वराकारं गणेश्वरसमावृतम् ॥ |
| 10.6 | रुद्रः | रुद्रः | जगती | दधानमेकादशधा विभज्य देहं<br>विशुद्धस्फटिकप्रकाशम् ।<br>तेजोमयं शूलिनमिन्दुमौलिं विचिन्तयेदत्र सदैव रुद्रम्<br>॥ |
| 10.7 | अत्रिः | शम्भुः | त्रिष्टुप् | कुर्वाणं सन्निधौ देव्या देवमानन्दताण्डवम् ।<br>हुताशनधरं ध्यायेत्तप्तकाञ्चनसन्निभम् ॥ |
| 10.8 | वैयाघ्रः | रुद्रः | त्रिष्टुप् | उद्यद्भास्करकोटिप्रकाशमाकाशगं भीमम् ।<br>भीतिघ्नमभयवरदं ध्यायेत् रुद्रं सुरौघनुतम् ॥ |
| 10.9 | रुद्रः | रुद्रः | त्रिष्टुप् | गजचर्मावृततनुं स्फुरत्प्रहरणोज्वलम् ।<br>सर्वपापहरं ध्यायेद्देवं कुन्जरभेदिनम् ॥ |
| 10.10 | वैराजः | शम्भुः | पञ्चपदा त्रिष्टुप् | मङ्गलायतनं देवं युवानमतिसुन्दरम् ।<br>ध्यायेद्वनचराकारमागच्छन्तं पिनाकिनम् ॥ |
| 10.11 | पुलहः | शम्भुः | अनुष्टुप् | प्रसन्नवदनं शान्तं चरितोद्वाहमण्डनम् ।<br>अम्बया सहितं ध्यायेत्सुरसङ्घैरभिष्टुतम् ॥ |

| | | | | |
|---|---|---|---|---|
| 10.12 | नारदः / कण्वः | रुद्रः | अनुष्टुप् | सर्वपापहरं देवं सर्वाभरणभूषितम् ।<br>सर्वायुधधरं ध्यायेत्सर्वलोकमहेश्वरम् ॥ |

**एकादशानुवाकम् ।**

<table>
<tr><th>#.#</th><th>ऋषिः</th><th>देवता</th><th>छन्दः</th><th>ध्यानश्लोकम्</th></tr>
<tr><td>11.1 – 11.4</td><td>दुर्वासः</td><td rowspan="2">रुद्रः</td><td rowspan="2">अनुष्टुप्</td><td rowspan="3">दंष्ट्राकरालवदनं ज्वलज्ज्वलनमूर्धजम् ।<br>बिभ्राणं त्रिशिखं दीपं ध्यायेत्भुजगभूषणम् ॥</td></tr>
<tr><td>11.5 – 11.10</td><td>देवलः</td></tr>
<tr><td>11.11</td><td>रुद्रः</td><td>रुद्रः</td><td>अनुष्टुप्</td></tr>
</table>

## 2.2 अर्थावबोधने व्याकरण-निरुक्तौ ।

### 2.2.1 मुखं व्याकरणं स्मृतम् ।

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम् । Pāṇini’s Vyākaraṇa is considered as Vedāṅga, as it both explains classical as well as Vedic Sanskrit. The text starts with 14 mahesvara sūtrās, which are the revealed sounds in the higher states of samādhi— अइउण् । ऋऌक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङ्णनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् ।

*Figure 4. Concept of Pañca-kṛtyās through Maheśvara sūtrās.*




These 14 sūtrās list the core syllables of Sanskrit: अ-इ-उ-ऋ-ऌ-ए-ऐ-ओ-औ । क-ख-ग-घ-ङ । च-छ-ज-झ-ञ । ट-ठ-ड-ढ-ण । त-थ-द-ध-न । प-फ-ब-भ-म । य-र-ल-व-श-ष-स-ह ।. These 14-sūtras

are elaborated in the commentary of Nandikeśvara kāśikā, explaining the process of sarga – sthiti – saṃhāra – tirobhava – anugraha using these 43 syllables. These 43 syllables are the seeds of the entire Vedic literature, similar to 43-triangles in the Śri-yantra as the basis of all other yantras.

### 2.2.1.1 वृषभो रोरवीति महो देवो मर्त्याँआविवेश ।

The process of creation is explained in this Ṛgvedic mantra, describing the Śabda-Brahman creating and entering into the world of māyā through his saṅkalpa.

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँआविवेश ॥ ऋग्वेदः 4.58.6 ॥

Patañjali maharṣi explains this mantra through Vyākaraṇa perspective as described below:

- चत्वारि शृङ्गाः → चत्वारि पदजातानि नाम-आख्यात-उपसर्ग-निपाताः च ।
- त्रयो अस्य पादाः → त्रयः कालाः भूत भविष्यत् वर्तमानाः ।
- द्वे शीर्षे → द्वौ शब्दात्मनौ नित्यः (व्यङ्ग्यः) कार्यः(व्यञ्जकः) च ।
- सप्त हस्तासो अस्य । → सप्त विभक्तयः ।
- त्रिधा बद्धो → त्रिषु स्थानेषु बद्धः उरसि, कण्ठे, शिरसि इति ।
- वृषभः → वृष सेचने । (वृषभो वर्षणात् । वर्षणञ्च ज्ञानपूर्वकानुष्ठानेन फलप्रदत्वम् ।)
- रोरवीति → शब्दं करोति इति ।
- महः देवः → महान् देवः = शब्दः । मर्त्यान् → मरणधर्माणः मनुष्याः, तान् । आविवेश ॥

(पातञ्जल महाभाष्ये पस्पशाह्निकम् ।)

The four forms of words explain the essence of creation:

1. nāma,
2. ākhyāta,
3. upasarga and
4. nipātās.

(1) The nāma indicates a name to everything that exists. This has seven declensions (vibhakti), and each of them indicate the kriya śakti of the brahman. Pāṇini sutras explain the same.

i. स्वतन्त्रः कर्ता ॥ 1,4.54 ॥ Independent, Never under bondage. Indicates puruṣa.

ii. कर्तुरीप्सिततमं कर्म ॥ 1,4.49 ॥ अकथितं च ॥ 1,4.51 ॥ Object of saṅkalpa by the puruṣa.

iii. साधकतमं करणम् ॥ 1,4.42 ॥ Instruments, indicates his indriyas.

iv. कर्मणा यमभिप्रैति स सम्प्रदानम् ॥ 1,4.32 ॥ नमस्स्वस्ति स्वाहा स्वधालं वषड्योगाच्च ॥ 2,3.16 ॥ The experiencer, for whom this world is manifested.

v. ध्रुवमपाये ऽपादानम् ॥ 1,4.24 ॥ Indicates the difference / comparison between the īśvara and puruṣa.

vi. कारक प्रातिपदिकार्थ व्यतिरिक्तः स्वस्वामिभावादिः संबन्धः शेषस्तत्र षष्ठी । Indicates the sambandha of prakṛti and puruṣa.

vii. आधारो ऽधिकरणम् ॥ 1,4.45 ॥ Indicates the supporter of the jagat.

(2) The ākhyāta indicates 6 bhāvās—

1. जायते (manifests),
2. अस्ति (exists),
3. विपरिणमते (changes),
4. वर्धते (grows),
5. अपक्षीयते (reverses),
6. विनश्यति (dissolves),

of the prakṛti and its manifestation of 24 tattvās. So, ākhyātās describe everything in this world (jagat).

(3) Upasargas further combine with nāma or ākhyāta words for better understanding of the tattvam.

(4) Nipātās are used as fillers in the chandas or emphasizers etc…

Thus, Vyakaraṇa-śāstra is used to understand the vedic mantras in their correct form (so that wordly desires can be fulfilled with correct reciting) and also to reveal the lakṣaṇās of brahman.

### 2.2.1.2 नन्दिकेश्वर-काशिका

संस्कृत व्याकरणशास्त्रे महेश्वरसूत्राणां प्राशस्त्यं लोकविदितमेव । 1. अइउण् । 2. ऋलृक् । 3. एओङ् । 4. ऐऔच् । 5. हयवरट् । 6. लण् । 7. ञमङ्णनम् । 8. झभञ् । 9. घढधष् । 10. जबगडदश् । 11. खफछठथचटतव् । 12. कपय् । 13. शषसर् । 14. हल् । इति चतुर्दश-महेश्वरसूत्राणि । अस्मिन् विषये नन्दिकेश-काशिकायां वर्ण्यते —

> नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
>
> उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ (नन्दिकेश्वरकाशिका-1)

नृत्तावसाने = यदा चित्तवृत्तयः निरुद्धाः (असम्प्रज्ञाते समाधौ) सन्, नटराजराजः = ईश्वरः, सनकादिसिद्धान् = चतुर्विध (वितर्क-विचार-आनन्द-अस्मिता) तापासान्, उद्धर्तुकामः = चित्तविक्षेपाद्यन्तरायाभ्याम् उद्धर्तुं कामः यस्य सः, नवपञ्चवारम् = चतुर्दशवारम् (पञ्चवारं जगद्व्यक्तीकरणार्थं, नववारं जगतः स्तुत्यर्थं च), ढक्कां ननाद = अव्यक्तान् शब्दान् बोधयामास । एतद् शिवसूत्रजालम् = एतान् चतुर्दश सूत्रान्, विमर्शे = विचार्य स्फुटीकरोमि । तथा चतुर्दशवारं याः नादाः श्रुताः तयेव महेश्वरसूत्राणि वा शिवसूत्राणि इति नम्ना प्रख्याताः ।

**योगदर्शन सारूप्यम्**

अत्र नृत्तावसनम् सूचयति असम्प्रज्ञात-चित्तम् । यथा,

- नृत्तम् = नृत् + क्तः । नृती गात्रविक्षेपे । गाते = गच्छति, इति गात्रम् । गाङ् गतौ । गात्रं सूचयति गमनशीलत्वं च वृत्तिसहितं चित्तम् । तस्य क्षेपं = गात्रविक्षेपम् । क्षिप प्रेरणे । अतः, नृत्तं सूचयति चित्तसत्त्वम् यत् प्रेरयति वृत्तिषु वा निरोधे वा । तस्य भावः नृत्तम् ।
- अवसानम् = अव+सो+ल्युट् । अव इत्युपसर्गविशेषः, निश्चयार्थे । षो अन्तकर्मणि । अतः, अवसानम् = क्रियासमाप्तिः = विरामः ।
- नृत्तावसानम् = नृत्तस्य अवसानम् । यत्र गात्रविक्षेपण क्रियायाः विरामः तत् नृत्तावसानम् । तदा निरोधपरिणामान्विताश्च चित्तवृत्तयः, यत्र चित्ते प्रत्ययानां विरामश्च तथा प्रेरणात्माकाभ्यासक्रियायाः समाप्तिश्च । तदेव असम्प्रज्ञातः समाधिः, यथा पातञ्जलदर्शने— विराम प्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः (योगसूत्रम्-1.18) ।

नटराजराजः = ईश्वरस्य वाचकः । यथा—

- नटे राजा = नटराजः । णट नृतौ । राजृ दीप्तौ । चित्तसत्त्वे प्रदीप्यमानः पुरुषः । नटराजेषु राजा नटराजराजः = पुरुषविशेषः ईश्वरः । क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरेति (योगसूत्रम्-1.24) । अतः नटराजराजः = ईश्वरः ।

ढक्कां निनाद = ढक् इति अव्यक्तं कायतीति ढक्का । तस्मात् ढक्का-नादं श्रावयामास ।

- ढक्का = ढक्+कै+डः+टाप् । कै+डः = कं = शिरः । कायति = शब्दो निर्गच्छति यतः यस्मिन् सति । कै शब्दे ।
- निनाद = नद्+लिट् । णद अव्यक्ते शब्दे । नादं चकार । यन्नादं प्रणवम् अव्यक्तं च तस्य व्यक्तं बभूव ।
- किन्नाम नाद इत्युच्यते? नाद शब्दस्योत्पत्तिर्यथा— नादः = नद्+घञ् । णद अव्यक्ते शब्दे । अव्यक्तस्य शब्दस्य भावः नादः ।
- ढक्का नादम् = समाधि-निष्पत्तौ सूक्ष्मतरं यच्छब्दं श्रूयते अव्यक्तरूपेण तदेव ढक्कानादम् । यथोच्यते—

  सिद्धासने स्थितो योगी मुद्रां सन्धाय वैष्णवीम् ।
  श्रुणुयाद्दक्षिणे कर्णे नादमन्तर्गतं सदा ॥ (नादबिन्दूपनिषत्-31)

  महति श्रूयमाणे तु महाभेर्यादिकध्वनौ ।
  तत्र सूक्ष्मं सूक्ष्मतरं नादमेव परामृशेत् ॥ (नादबिन्दूपनिषत्-36)

नवपञ्चवारम् – चतुर्दशमहेश्वरसूत्राणं विभागद्वयम् ।

- सृष्टिः पच्यते अनेन पञ्चसूत्र्या क्रमेण इति पञ्चवारम् । पचि व्यक्तीकरणे ।
  - 1. अइउण् । 2. ऋलक् । 3. एओङ् । 4. ऐऔच् । 5. हयवरट् । इति पञ्चभिः सूत्रक्रमेण सृष्टिः व्यक्तीकृतम् ।
- नूयते इति नव । तत् स्तूयते आध्यात्मिकस्थितये जीवैः अनेन नवसूत्रैः क्रमेण इति नववारम् । णु स्तुतौ ।
  - 6. लण् । 7. ञमङ्णनम् । 8. झभञ् । 9. घढधष् । 10. जबगडदश् । 11. खफछठथचटतव् । 12. कपय् । 13. शषसर् । 14. हल् । इति नवभिः सूत्रक्रमेण सृष्टिविशेषाः स्तूयन्ते ।

उद्धर्तुकामः = उद्धर्तुं कामः यस्य सः । ईश्वरप्रणिधानं सूचितमत्र ।

- उत्+धृ+तुमुन् = पतनात् ऊर्ध्वं धर्तुम् । धृञ् धारणे ।
- कामः = कम्+घञ् । काम्यते असौ । कमु कान्तौ ।
- यथा ईश्वरप्रणिधानस्य फलमुक्तम् पातञ्जले योगदर्शने—ततः प्रत्यक्चेतानाधिगमोऽप्यन्तरायाभावाश्च । (योगसूत्रम्-1.29)

सनकादि सिद्धास्तु सवितर्कादि-सम्प्रज्ञातयोगसिद्धा एव । कथम् इत्युक्ते—

- चत्वारः सत्यलोकस्थाः वर्णिताः पातञ्जलयोगदर्शने व्यासभाष्ये, तयेव सनकादि तापसाः —
    - तृतीये ब्रह्मणः सत्यलोके चत्वारो देवनिकायः अच्युताः, शुद्धनिवासाः, सत्याभाः संज्ञासंज्ञिनश्चेति । अकृतभवनन्यासाः स्वप्रतिष्ठा उपर्युपरिस्थिताः प्रधानवशिनो यावत्सर्गायुषः । तत्राच्युताः सवितर्कध्यानसुखाः । शुद्धनिवासाः सविचारध्यानसुखाः । सत्याभा आनन्दमात्रध्यानसुखाः । संज्ञासंज्ञिनश्चास्मितामात्रध्यानसुखाः । तेऽपि त्रैलोक्यमध्ये प्रतितिष्ठन्ति । (व्यासभाष्यम्-3.26)
  - भागवतपुराणे वर्णितम् ब्रह्मणा तपसः सनकादीनां सम्भवः, यथा—

    तप्तं तपो विविधलोकसिसृक्षया मे ।<br>
    आदौ सनात् स्वतपसः स चतुःसनोऽभूत् । (भागवत-पुराणम् 2.7.5)

- सनत् = सनातनः ब्रह्मा । षनु दाने ।
    - सनकः = सनतः ब्राह्मणः धर्मः सनकः । सवितर्कध्यानसुखाः ।
    - सनातनः = सदा भवः सनातनः । सविचारध्यानसुखाः ।
    - सनन्दनः = सनतं ब्रह्माणं नन्दयति इति सनन्दनः । आनन्दमात्रध्यानसुखाः ।
    - सनत्कुमारः = सनतः ब्राह्मणः, तस्य कुमारः । अस्मितामात्रध्यानसुखाः ।

## पञ्चभिस्सूत्रैः जगद्व्यक्तीकरणम्

महेश्वरसूत्रेभ्यः नन्दिकेश्वरेण काशिका नाम भाष्यं विरचितम् । काशिका अपि उपमन्युमहर्षिणा कृता तत्तविमर्शिनी नाम्ना व्याख्यानेन सुशोभते । महेश्वरसूत्रेषु तत्त्वार्थ दर्शनार्थम् एतयोः व्याख्यानद्वयम् अत्यावश्यकम् भवति ।

1) अ इ उ ण् ।

अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु ।

चित्कलामिं समाश्रित्य जगद्रूप उणीश्वरः ॥ नन्दिकेश्वर-काशिका-3 ॥

तथा अष्टसु कारिकेषु अकार-इकार-उकाराणां विस्तृत्रा चर्चा क्रियते । अकारः निर्गुणतत्त्वं सूचयति । यथोक्तं भगवद्गीतायां अक्षराणामकारोऽस्मि । (10.33) । इकारः चित्कलाम्, इच्छाशक्तिं, कामबीजं, जगत्कारणत्वं च सूचयति । उकारस्तु व्यापकत्वं वा सगुणत्वं बोधयति ।

- अ = ब्रह्मरूपः, सर्ववस्तुषु निर्गुणः, प्रकाशः, परमेश्वरः ।
- इ = चित्कला, शक्तित्वम्, जगत्-कारणत्वम्, सर्ववर्णानां-कारणं, कामबीजम्, इच्छाशक्तिः ।
- उ = विष्णुः (व्यापकत्वम्, सगुणत्वम्) ।

यथा ॐकारात् चितिशक्तिः ज्ञायते; तथा अकारात् ज्ञानशक्तिः, इकारात् इच्छाशक्तिः, उकारात् क्रियाशक्तिश्च ज्ञेयाः । तथैव च ब्रह्माण्डपुराणान्तर्गत-ललितासहस्रनामावल्याम्—

इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्ति-स्वरूपिणी ।

सर्वाधारा सुप्रतिष्ठा सदसद्रूप-धारिणी ॥ 130॥

2) ऋ ऌ क् ।

ऋकारात् सर्वेश्वरो ज्ञातव्यम् । ऌकारात् मनोवृत्तिं त्रिगुणात्मिकां च भावयेत् । तथा, जगत्सर्वं सृष्ट्वा तदेवानुप्राविशत् । यथा ऋऌवर्णयोः सादृश्यं तथैव चित्तस्य च तद्वृत्तीनां च सादृश्यम् । तदुक्तं पातञ्जले, वृत्तिसारूप्यमितरत्र (योगसूत्रम्-1.4) ।

ऋऌक् सर्वेश्वरो मायां मनोवृत्तिमदर्शयत् ।

तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनत् ॥ नन्दिकेश्वर-काशिका-10 ॥

- ऋ = सर्वेश्वरः, ऋतम्, चित्तम् ।
- ऌ = माया, मनोवृत्तिः ।

3) ए ओ ङ् ।

एकारः सूचयति मायायुक्तं पुरुषम्, तस्य दर्शन शक्तिं च । ओकारः सूचयति केवलं पुरुषम्, तस्य दृग्शक्तिं च । किन्तु बन्धश्च मोक्षश्च प्रकृतेः धर्मौ न च पुरुषस्य । पुरुषः कदापि न बध्यते वा न मुच्यते । सः केवलः साक्षी च । अविद्यावृताऽऽस्मिता तत्त्वमेव बन्धकारणम् । दृग्दर्शनशक्त्योरेकात्मतेवास्मिता (योगसूत्रम्-2.6) ।

एओं मायेश्वरात्मैक्यविज्ञानं सर्ववस्तुषु ।

साक्षित्वात् सर्वभूतानां स एक इति निश्चितम् ॥ नन्दिकेश्वर-काशिका-13 ॥

- ए = अ+इ = अक्षरात्मकः + मायायुक्तः ।
- ओ = अ+उ = अक्षरात्मकः + ज्ञानरूपः, निर्गुणत्वम् + सगुणत्वम् ।

4) ऐ औ च् ।

ऐकारस्तु जगत्स्वरूपम् । औकारस्तुः परमेश्वरः । अत्र जगतः तिरोभावादनन्तरं परमेश्वरस्य अनुग्रहं स्मर्यते ।

ऐऔच् ब्रह्मस्वरूपः सन् जगत् स्वान्तर्गतं ततः ।

इच्छया विस्तरं कर्त्तुमाविरासीन्महामुनिः ॥ नन्दिकेश्वर-काशिका-14 ॥

- ऐ = आ+ई = अक्षरः + आदिशक्तिः, जगत् ।
- औ = आ+ऊ = ब्रह्मस्वरूपः, सम्प्रज्ञानस्वरूपः, परमेश्वरः ।

5) ह य व र ट् ।

अत्र भौतिकसृष्टेः प्रारम्भः भवति । ह = आकाशः, य= वायुः, र=अग्निः, व=जलम् ।

हकाराद् व्योमसंज्ञं च यकाराद्वायुरुच्यते ।

रकाराद्वह्निस्तोयं तु वकारादिति सैव वाक् ॥ नन्दिकेश्वर-काशिका-16 ॥

तथा, एतस्मिन् सूत्रपञ्चके सृष्टिवर्णनं कृतम् । तदनन्तरं नवसु सूत्रेषु, तन्मात्राणाम् इन्द्रियानाम् अन्तःकरणस्य त्रिगुणानां च सृष्टिक्रमं व्याख्यातम् ।

**नवभिः सूत्रैः जीवभावेन जगतः स्तुतिः ।**

6) ल ण् = पृथिवी-तत्त्वम्, आधार-भूतम्, अन्नादीनां कारणम् ।

आधारभूतं भूतानामन्नादीनां च कारणम् ।

अन्नाद्रेतस्ततो जीवः कारणत्वाल्लणीरितम् ॥ नन्दिकेश्वर-काशिका-17 ॥

7) ञ म ङ णा न (म्) = शब्द-स्पर्श-रूप-रस-गन्धाः ।

शब्दस्पर्शौ रूपरसगन्धाश्च ञमङणनम् ।

व्योमादीनां गुणा ह्येते जानीयात् सर्ववस्तुषु ॥ नन्दिकेश्वर-काशिका-18 ॥

8) झ भ (ञ्) = वाक्-पाणीन्द्रियौ (सर्वजन्तुषु विज्ञेयं, स्थावरादौ न विद्यते) ।

वाक्पाणी च झभञासीद्विराड्रूपचिदात्मनः ।

सर्वजन्तुषु विज्ञेयं स्थावरादौ न विद्यते ॥ नन्दिकेश्वर-काशिका-19 ॥

9) घ ढ ध (ष्) = पाद-पायु-उपस्थाः (सर्वभूतानाम् विज्ञेयम्) ।

घढधष् सर्वभूतानां पादपायू उपस्थकः ।

कर्मेन्द्रियगणा ह्येते जाता हि परमार्थतः ॥ नन्दिकेश्वर-काशिका-20 ॥

10) ज ब ग ड द (श्) = श्रोत्र-त्वक्-नयन-घ्राण-जिह्वाः (सर्वेषामपि जन्तूनां विद्यते) ।

श्रोत्रत्वंनयनघ्राणजिह्वाधीन्द्रियपंचकम् ।

सर्वेषामपि जन्तूनामीरितं जबगडदश् ॥ नन्दिकेश्वर-काशिका-21 ॥

11) ख फ छ ठ थ = प्राण-अपान-समान-उदान-व्यानाश्च & च ट त (व्) = मनो-बुद्धि,-अहङ्काराश्च ।

वर्गद्वितीयवर्णोत्थाः प्राणाद्याः पंच वायवः ।

मध्यवर्गत्रयाज्जाता अन्तःकरणवृत्तयः ॥ नन्दिकेश्वर-काशिका-23 ॥

12) क प (य्) = प्रकृति-पुरुषौ ।

प्रकृतिं पुरुषंचैव सर्वेषामेव सम्मतम् ।

सम्भूतमिति विज्ञेयं कपय् स्यादिति निश्चितम् ॥ नन्दिकेश्वर-काशिका-24 ॥

13) श = राजसगुणम् ; ष = तामसगुणम् ; स = सत्त्वगुणम् ; (र्) ।

शकारद्राजसोद्भूतिः षकारात्तामसोद्भवः ।

सकारात्सत्त्वसम्भूतिरिति त्रिगुणसम्भवः ॥ नन्दिकेश्वर-काशिका-26 ॥

14) ह (ल्) = शिव वर्णः ।

हकारः शिववर्णः स्यादिति शैवागमस्मृतिः । स ईश्वरः तत्त्वातीतः साक्षी च । तस्य तिरोधानं वर्णितमस्मिन्नन्तिमसूत्रे । इत्युक्ते केवलस्थितिः । यथा चोक्तम्— पतञ्जलिना पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति (योगसूत्रम् 4.34) ।

तत्त्वातीतः परं साक्षी सर्वानुग्रहविग्रहः ।
अहमात्मा परो हल् स्यामिति शम्भुस्तिरोदधे ॥ नन्दिकेश्वर-काशिका-27 ॥

*Table 9. Tattva darśanam in the 43 syllables of Maheśvara-sūtrās.*

| | |
|---|---|
| अ | ब्रह्मरूपः, सर्ववस्तुषु निर्गुणः, प्रकाशः, परमेश्वरः |
| इ | चित्कला, शक्तित्वम्, जगत्-कारणत्वम्, सर्ववर्णानां-कारणं, कामबीजम्, इच्छाशक्तिः |
| उ | विष्णुः (व्यापकत्वम्, सगुणत्वम्) |
| ऋ | सर्वेश्वरः, ऋतम् |
| ऌ | माया, मनोवृत्तिः |
| ए | अ+इ → अक्षरात्मकः + मायायुक्तः |
| ओ | अ+उ → अक्षरात्मकः + ज्ञानरूपः , निर्गुणत्वम् + सगुणत्वम् |
| ऐ | आ+ई → अक्षरः + आदिशक्तिः, जगत् |
| औ | आ+ऊ → ब्रह्मस्वरूपः, सम्प्रज्ञानस्वरूपः, परमेश्वरः |

.

| | | | | |
|---|---|---|---|---|
| क= प्रकृति | ख= प्राण-वायुः | ग= नयन-इन्द्रियम् (सर्वेषामपि जन्तूनाम्) | घ= पाद-इन्द्रियम् (सर्वभूतानाम्) | ङ= रूपः |
| च = मनो-वृत्तिः | छ= समान-वायुः | ज= श्रोत्र-इन्द्रियम् (सर्वेषामपि जन्तूनाम्) | झ= वाक्-इन्द्रियम् (सर्वजन्तुषु विज्ञेयं, स्थावरादौ न विद्यते ॥) | ञ= शब्दः |
| ट= बुद्धि-वृत्तिः | ठ= व्यान-वायुः | ड= घ्राण-इन्द्रियम् (सर्वेषामपि जन्तूनाम्) | ढ= पायु-इन्द्रियम् (सर्वभूतानाम्) | ण= रसः |
| त= अहङ्कार-वृत्तिः | थ= उदान-वायुः | द= जिह्वा-इन्द्रियम् (सर्वेषामपि जन्तूनाम्) | ध= उपस्थ-इन्द्रियम् (सर्वभूतानाम्) | न= गन्धः |

| | | | | |
|---|---|---|---|---|
| प= पुरुषः | फ= अपान-वायुः | ब= त्वक्-इन्द्रियम् (सर्वेषामपि जन्तूनाम्) | भ= पाणि-इन्द्रियम् (सर्वजन्तुषु विज्ञेयं, स्थावरादौ न विद्यते ॥) | म= स्पर्शः |
| य= वायु-तत्त्वम् | र= वह्नि-तत्त्वम् | ल= पृथिवी-तत्त्वम्, आधार-भूतम्, अन्नादीनां कारणम् | व= अम्बु-तत्त्वम् | ह= व्योम-तत्त्वम् |

- श= राजस-गुणम्
- ष= तामस-गुणम्
- स= सत्त्व-गुणम्
- ह= शिव वर्णः

**उपसंहारः**

तथा चतुर्दशमहेश्वरसूत्रेषु पञ्चविंशतितत्त्वानामवलोकनं स्पष्टीकृतम् । सर्गस्थितिसंहारतिरोभवानुग्रहानां पञ्चकृत्यानां वर्णनम् त्रयश्चत्वारिंशद्भिरक्षरैः प्रदर्शितम् । यथा 43 त्रिकोणाः श्रीचक्रस्य बीजानि भवन्ति, तथैव ढक्काजनितानि एतानि 43 अक्षराणि वेदवङ्मयस्य बीजानि भवन्ति । अस्मिन् जगति यत्सर्वं नामरूपैर्निर्दिशितं तदहं शब्देन प्रख्यातम्, यथा—

अकारः सर्ववर्णाग्र्यः प्रकाशः परमेश्वरः ।
आद्यमन्त्येन संयोगात् अहमित्येव जायते ॥ नन्दिकेश्वर-काशिका-4 ॥

नृत्तावसानं सूचयति असम्प्रज्ञातासमाधिस्थं परमेश्वरम् । सम्प्रज्ञातस्थानां योगिनामुद्धर्तुम् नवपञ्चवारं चकार ढक्कानादान् अव्यक्तान् च । तथा महेश्वरसूत्राणां योगदर्शनसारूप्यं, पुनस्तत्र पञ्चविंशतितत्त्वानां निरूपणं च नित्यमुक्तस्य केवलस्य ईश्वरस्य स्वरूपमपि च व्याख्यातम् ।

### 2.2.2 निरुक्तं श्रोत्रमुच्यते ।

अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम् । निःशेषेन पदानामर्था उच्यन्ते यत्र तन्निरुक्तम् । यास्काचार्यस्य निरुक्तिशास्त्रं वेदाङ्गत्वेन शोभते । चतुर्दशाध्यायी निरुक्तमिदं निघण्टुग्रन्थस्य टीका अस्ति । कश्यप-प्रजापतिना प्रोक्तः निघण्टुः वैदिकशब्द-कोषभूतः, पञ्चाध्यायी काण्डत्रयी च । निघण्टुग्रन्थस्य काण्डत्रयं यथा—

1. नैघण्टुक काण्डम् (प्रथमादि अध्याय-त्रयम्)
2. नैगम काण्डम् (चतुर्धः अध्यायः)
3. दैवत काण्डम् (पञ्चमः अध्यायः)

समाम्नायः समाम्नातः। स व्याख्यातव्यः । तमिमं समाम्नायं 'निघण्टव' इत्याचक्षते । इति, ग्रन्थारम्भे यास्काचार्यः निघण्टु वर्णनं कृत्वा, तस्य व्युत्पत्तिं निरूपयति यथा —

- निघण्टवः कस्मात् । निगमा इमे भवन्ति । छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः ।
- ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवः।
- अपि वा हननादेव स्युः। समाहता भवन्ति। यद्वा समाहृता भवन्ति। (निरुक्तम् 1.1)

#### 2.2.2.1 काश्यपः निघण्टुः

पञ्चाध्यायी च काण्डत्रयी च निघण्टुः । तस्य कर्ता कश्यपः इति महाभारतस्य अनेन श्लोकद्वयेन अवगम्यते ।

वृषो हि भगवान् धर्मः ख्यातो लोकेषु भारत।
निघण्टुकपदाख्याने विद्धि मां वृषभुत्तमम् ॥ महाभारतम् 12.342.86
कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते।
तस्माद् वृषाकपिं प्राह कश्यपो मां प्रजापतिः ॥ महाभारतम् 12.342.87

अस्य ग्रन्थस्य त्रिषु काण्डेषु वर्णितविषायाः —

1. नैघण्टुक-काण्डे त्रिषु अध्यायेषु → एकार्थम् अनेक शब्दाः
2. नैगमकाण्डे → एकपदिकाः (अनेकार्थानि एकशब्दानि)
3. दैवत काण्डम्
    - देवविद्यायाः आधारभूतसिद्धान्तानां निरूपणम्
    - सङ्कलितानां देवतानां स्वरूपनिरूपणम्

**(1) नौघण्टुक-काण्डम् (1329 शब्दाः व्याख्याताः)**

अस्मिन् काण्डे त्रिषु अध्यायेषु → एकार्थम् अनेक शब्दाः व्याख्याताः यथा—

- प्रथमाध्याये पृथिव्यादीनां 415 शब्दाः व्याख्याताः । तत्र, पृथिव्याः 21-नामाः, हिरण्यस्य 15-नामाः, अन्तरिक्षस्य 16-नामाः, ... इत्येवं व्याख्याताः ।
- द्वितीयाध्याये कर्मादीनां 516 शब्दाः व्याख्याताः । कर्मणः 26-नामाः, अपत्यस्य 15-नामाः, मनुष्याणां 25-नामाः ... इत्येवं व्याख्याताः ।
- तृतीयाध्याये बह्वादीनां 398 शब्दाः व्याख्याताः । बहोः 12-नामाः, ह्रस्वस्य 11-नामाः, महतः 25-नामाः ... इत्येवं व्याख्याताः ।

*Table 10. Topics covered in the 1-3 adhyāyās of Kāśyapa Nighaṇṭu.*

| **1.i प्रथमाध्यायः (415)** | **1.ii द्वितीयोऽध्यायः (516)** | **1.iii तृतीयोऽध्यायः (398)** |
|---|---|---|
| 1,01 पृथिव्याः (21) | 2,01 कर्मणः (26) | 3,01 बहोः (12) |
| 1,02 हिरण्यस्य (15) | 2,02 अपत्यसय (15) | 3,02 ह्रस्वय (11) |
| 1,03 अन्तरिक्षस्य (16) | 2,03 मनुष्याणाम् (25) | 3,03 महतः (25) |
| 1,04 साधारणानि (6) | 2,04 बाह्वोः (12) | 3,04 गृहाणाम् (10) |
| 1,05 रश्मीनाम् (15) | 2,05 अङ्गुलीनाम् (22) | 3,05 परिचरणकर्माणः (10) |
| 1,06 दिशाम् (8) | 2,06 कान्तिकर्माणः (18) | 3,06 सुखस्य (20) |
| 1,07 रात्रेः (23) | 2,07 अन्नस्य (28) | 3,07 रूपस्य (16) |
| 1,08 उषसः (16) | 2,08 अत्तिकर्माणः (10) | 3,08 प्रशस्यस्य (10) |
| 1,09 अह्नः (12) | 2,09 बलस्य (28) | 3,09 प्रज्ञायाः (11) |
| 1,10 मेघानाम् (30) | 2,10 धनस्य (28) | 3,10 सत्यस्य (6) |
| 1,11 वाचः (57) | 2,11 गवाम् (9) | 3,11 पश्यतिकर्माणः (8) |
| 1,12 उदकस्य (101) | 2,12 क्रुध्यतिकर्माणः (10) | 3,12 आमिश्राणि (9) |
| 1,13 नदीनाम् (37) | 2,13 क्रोधस्य (11) | 3,13 उपमाः (12) |
| 1,14 अश्वानाम् (26) | 2,14 गतिकर्माणः (122) | 3,14 अर्चतिकर्माणः (44+?16)) |
| 1,15 आदिष्टोपयोजनानि (10) | 2,15 क्षिप्रस्य (26) | 3,15 मेधाविनाम् (24) |
| 1,16 ज्वलतिकर्माणः (11) | 2,16 अन्तिकस्य (11) | |

| | | |
|---|---|---|
| 1,17 ज्वलतः (11) | 2,17 सङ्ग्रामस्य (46)<br>2,18 व्याप्तिकर्माणः (10)<br>2,19 वधकर्माणः (33)<br>2,20 वज्रस्य (18)<br>2,21 ऐश्वर्यकर्माणः (4)<br>2,22 ईश्वरस्य (4) | 3,16 स्तोतृनामानि (13)<br>3,17 यज्ञस्य (15)<br>3,18 ऋत्विजाम् (8)<br>3,19 याच्ञाकर्माणः (17)<br>3,20 दानकर्माणः (10)<br>3,21 अध्येषणकर्माणः (4)<br>3,22 स्वपितिकर्माणौ (2)<br>3,23 कूपस्य (14)<br>3,24 स्तेनस्य (14)<br>3,25 निर्णीतान्तर्हित नामधेयानि (6)<br>3,26 दूरस्य (5)<br>3,27 पुराणस्य (6)<br>3,28 नवस्य (6)<br>3,29 द्विशः (26)<br>3,30 द्यावापृथिव्योः (24) |

**(2) नैगम काण्डम् (278 एकपदिकाः व्याख्याताः)**

अत्र एकैकस्य शब्दस्य अनेकार्थानि व्याख्यातानि । यथा, जहा-शब्दस्य अनेकार्थाः, तथैव निधा-शब्दस्य, पुनः शिताम शब्दस्य, ...इत्येवं 278 एकपदिकाः व्याख्याताः । तत्र,

- जहातः → अस्य, पर्यन्तं 62-शब्दाः
- सस्निम् → सृणिः, पर्यन्तं 84-शब्दाः
- आशुशुक्षणिः → ऋबीसं, पर्यन्तं 132-शब्दाः व्याख्याताः ।

*Table 11. Topics covered in the 1-4th adhyāya of Kāśyapa Nighaṇṭu*

| | |
|---|---|
| 4.1 जहा → अस्य (62) | जहा । निधा । शिताम । मेहना । दमूनाः । मूषः । इषिरेण । कुरुतन । जठरे । तितौ । शिप्रे । मध्या । मन्दू । ईर्मान्तासः । कायमानः । लोधम् । शीरम् । विद्रधे । द्रुपदे । तुग्वनि । नंसन्ते । नसन्त । आहनसः । अद्मसत् । इष्मिणः । वाहः । परितक्म्या । सुविते । दयते । नूचित् । नूच । दावने । अकूपारस्य । शिशीते । सुतुकः । सुप्रायणाः । अप्रायुवः । च्यवनः । रजः । हरः । जुहुरे । व्यन्तः । क्राणाः । वाशी । विषुणः । जामिः । पिता । शंयो । अदितिः । एरिरे । जसुरिः । जरते । मन्दिने । गौः । गातुः । दंसयः । तूताव । चयसे । वियुत । ऋधक् । अस्याः । अस्य । |
| 4.2 सस्निम् → सृणिः (84) | सस्निम् । वाहिष्ठः । दूतः । वावशानः । वार्यम् । अन्धः । असश्चन्ती । वनुष्यति । तरुष्यति । भन्दनाः । आहनः । नदः । सोमः अक्षाः । श्वात्रम । ऊतिः । हासमाने । पड्भिः । ससम् । द्विता । व्राः । वराहः । स्वसराणि । शर्याः । अर्कः । पविः । वक्षः । धन्व । सिनम् । इत्था । सचा । चित । आ । द्युम्नम् । पवित्रम् । तोदः । स्वञ्चाः । शिपिविष्टः । विष्णुः । आघृणिः । पृथुज्रयाः । अथर्युम् । काणुका । अध्रिगुः । आङ्गूषः । आपान्तमन्युः । श्मशा । उर्वशी । वयुनम । वाजपस्त्यम् । वाजगन्ध्यम् । गध्यम् । गधिता । कौरयाणः । तौरयाणः । अह्रयाणः । हरयाणः । आरितः । व्रन्दी । निष्षपी । तूर्णाशम् । क्षुम्पम् । निचुम्पुणः । पदिम् । पादुः । वृकः । जोषवाकम् । कृत्तिः । श्वघ्नी । समस्य । कुटस्य । चर्षणिः । शम्बः । केपयः । तूतुमाकृषे । अंसत्रम् । काकुदम् । बीरिटे । अच्छ । परि । ईम् । सीम् । एनम । एनाम् सृणिः । |
| 4.3 आशुशुक्षणिः → ऋबीसम् (132) | आशुशुक्षणिः । आशाभ्यः । काशिः । कुणारुम् । अलातृणः । सललूकम् । कत्पयम् । विस्रुहः । वीरुधः । नक्षद्दाभम् । अस्कृधोयुः । निशृम्भाः । बृबदुक्थम् । ऋदूदरः । ऋदूपे । पुलुकामः । असिन्वती । कपना । भाऋजीकः । रुजानाः । जूर्णिः । ओमना । उपलप्रक्षिणी । उपसि । प्रकलवित् । अभ्यर्धयज्वा । ईक्षे । क्षोणस्य । अस्मे । पाथः । सवीमनि । सप्रथाः । विदथान । श्रायन्तः । आशीः । अजीगः । अमूरः । शशमानः । देवः देवाच्या कृपा7 । विजामातुः । ओमासः । सोमानम् । अनवायम् । किमीदिने । अमवान् । अमीवा । दुरितम् । अप्वा । अमतिः । श्रुष्ट । पुरन्धिः । रुशत् । रिशादसः । सुदत्रः । आनुषक् । तुर्वणिः । गिर्वणसे । असूर्ते सूर्ते । अम्यक् । यादृश्मिन् । जारयायि । अग्रिया । चनः । पचता । शुरुधः । अमिनः । जज्झती । अप्रतिष्कुतः । शाशदानः । सृप्रः । सुशिप्रः । शिप्रे । रंसु । द्विबर्हाः । अक्रः । उराणः । स्तियानाम् । स्तिपाः । जबारु । जरूथम् । कुलिशाः । तुञ्जः । बर्हणा । ततनुष्टिम । इलीबिशः । कियेधाः । भृमिः । विष्पितः । तुरीपम् । रास्पिनः । ऋञ्जतिः । ऋजुनीती । प्रतद्वसू । हिनोत । चोष्कूयमाणः । चोष्कूयते । सुमत् । दिविष्टिषु । दूतः । जिन्वति । अमत्र । ऋचीषमः । अनर्शरातिम् । अनर्वा । असामि । गल्दया । जळहवः । बकुरः । बेकनाटान् । अभिधेतन । अंहुर । बतः । बाताप्यम् । चाकन् । रथर्यति । असक्राम् । आधवः । अनवब्रव । सदान्वे । शिरिम्बिठः । पराशरः । क्रिविर्दती । करूलती । दनः । शरारुः । इदंयु । कीकटेषु । बुन्दः । वृन्दम् । किः । उल्बम् । ऋबीसम् ऋबीसम् । |

## (3) दैवत काण्डम्

यत्काम ऋषिर्यस्यां देवतायाम् आर्थपत्यम् इच्छन् स्तुतिं प्रयुङ्क्ते तत् दैवतः समन्त्रो भवति । इति मन्त्रस्य स्वरूपं व्याख्यातम् । मन्त्राः एव ऋछः, ते त्रिविधाः—

1. परोक्षकृताः → सर्वाभिः नाम-विभक्तिभिः युज्यन्ते प्रथम-पुरुषैश्च आख्यातस्य ।
2. प्रत्यक्षकृताः → मध्यम-पुरुष-योगाः त्वम् इति च, एतेन सर्वनाम्ना ।
3. आध्यात्मिक्यः → उत्तम-पुरुष-योगाः, अहम् इति च, एतेन सर्वनाम्ना । (निरुक्तम् 7.1 – 7.2)

तिस्र एव देवता इति नैरुक्ताः । तासां माहाभाग्यात् एकैकस्यापि बहूनि नामधेयानि भवन्ति । इति (निरुक्तम् 7.4)

1. अग्निः पृथिवी-स्थानः ।
2. वायुर्वा इन्द्रो वा अन्तरिक्ष-स्थानः ।
3. सूर्यो द्यु-स्थानः ।

पुनस्तत्र, त्रिषु लोकेषु वर्तमानानां देवतानां भक्तीनि व्याख्यातानि, यथा—

*Table 12. 3-gods (Agni, Indra, Sūrya) elaborated in the Nirukta, and their associations*

| भक्तीनि | अग्निः | इन्द्रः | सूर्यः |
|---|---|---|---|
| लोकः | अयं लोकः | अन्तरिक्षः लोकः | असौ लोकः |
| सवनम् | प्रातःसवनम् | माध्यन्दिनं सवनम् | तृतीयं सवनम् |
| ऋतुः | वसन्तः, शरत् | ग्रीष्मः, हेमन्तः | वर्षा, शिशिरः |
| छन्दः | गायत्री, अनुष्टुप्, | त्रिष्टुप्, पङ्क्तिः, | जगती, अतिछन्दः |
| स्तोमः | त्रिवृत्, एकविंशः | पञ्चदशः, त्रिणवः | सप्तदशः, त्रयस्त्रिंशः |
| सामः | रथन्तरम्, वैराजम् | बृहत्, शाक्करः | वैरूपः, रैवतः |
| देवगणाः | प्रथमस्थानीयाः देवगणाः । अग्नायी, पृथिवी चेति स्त्रियः । | मध्यमस्थानीयाः देवगणाः । देवस्त्रियश्च । | उत्तमस्थानीयाः देवगणाः । देवस्त्रियश्च । |
| कर्म | • हविषां-वहनम्,<br>• देवतानाम्-आवहनम्,<br>• दार्ष्टि-विषयकम्, | • रसानुप्रदानम्,<br>• वृत्रवधः,<br>• बलकृतिः | • रसादानम्,<br>• रश्मिभिः रसाधारणम्,<br>• प्रवह्लितम् । |
| संस्तविक-देवाः | इन्द्रः, सोमः, वरुणः, पर्जन्यः, ऋतवः, आग्नावैष्णवम् | अग्निः सोमः वरुणः पूषा बृहस्पतिः ब्रह्मणस्पतिः पर्वतः कुत्सः विष्णुः वायुः | चन्द्रमा, वायुः, संवत्सरः । |

| | | | |
|---|---|---|---|
| (यैः सह स्तूयते ते) | | । अथापि मित्रः वरुणेन संस्तूयते, पूष्णा रुद्रेण च सोमः, अग्निना च पूषा, वातेन च पर्जन्यः । | |

तथा, देवविद्यायाः आधारभूतसिद्धान्तानां निरूप्य, अग्न्यादीनां 153 देवता-विशेषानां व्याख्याति ।

तत्र, पृथिवीस्थानीयेषु 54 देवता-विशेषाः व्याख्याताः ।

- अग्निः, जातवेदाः, वैश्वानरः । इति 3 नामानि ।
- द्रविणोदाः, 12-आप्री-देवताः । प्रयाजा, अनुयाजा । इति 15 विशेषाः ।
- अश्वः, शकुनिः, मण्डूकाः, ... इत्यादीनि 36 पृथिव्यायतनानि सत्त्वानि ।

मध्यस्थानीयेषु 68 देवता-विशेषाः व्याख्याताः ।

- वायुः, वरुणः, रुद्रः, इन्द्रः, ... इत्यादयः 32 देवाः ।
- श्येनः, सोमः, ... इत्यादयः 7 देवाः ।
- मरुतः, रुद्राः, ऋभवः, ... इत्यादयः 8 देवगणाः ।
- अदितिः, सरमा, सरस्वती, ... इत्यादयः 21 स्त्रियः ।

द्युस्थानेषु 31 देवता-विशेषाः व्याख्याताः ।

- अश्विनौ, उषा, सूर्यः, ... इत्यादयः 23 देवाः ।
- आदित्याः, सप्तर्षयः, इत्यादयः 7 गणाः ।
- देवपत्न्यः । इति।

*Table 13. List of described in the 5th adhyāya of Kāśyapa Nighaṇṭu*

| | |
|---|---|
| पृथिवी-स्थानम् | • (3) अग्निः । जातवेदाः । वैश्वानरः । |
| | • (1) द्रविणोदाः ।<br>• (12) आप्री-देवताः → इध्मः । तनूनपात् । नराशंसः । इळ । बर्हिः । द्वारः । उषासानक्ता । दइव्या होतारा । तिस्रः देवीः (भारती, इळा, सरस्वती) । त्वष्टा । वनस्पतिः । स्वाहाकृतयः ।<br>• (2) प्रयाजा । अनुयाजा । |
| | • (36 सत्त्वानि) अश्वः । शकुनिः । मण्डूकाः । अक्षाः । ग्रावाणः । नाराशंस । रथः । दुन्दुभिः । इषुधिः । हस्तघ्नः । अभीशवः । धनुः । ज्या । इषुः । अश्वाजनी । उलूखलम । वृषभः । द्रुघणः । पितुः । नद्यः । आपः । ओषधयः । रात्रिः । अरण्यानी । श्रद्धा । पृथिवी । अप्वा । अग्नायी । उलूखलमुसले । हविर्धाने । द्यावापृथिवी । विपाट्छुतुद्री । आर्त्नी । शुनासीरौ । देवी जोष्ट्री । देवी ऊर्जाहुती । |

| | | |
|---|---|---|
| अन्तरिक्ष-स्थानम् | • (32) वायुः । वरुणः । रुद्रः । इन्द्रः । पर्जन्यः । बृहस्पतिः । ब्रह्मणस्पतिः । क्षेत्रस्य पतिः । वास्तोष्पतिः । वाचस्पतिः । अपां नपात् । यमः । मित्रः । कः । सरस्वान् । विश्वकर्मा । तार्क्ष्यः । मन्युः । दधिक्राः । सविता । त्वष्टा । वातः । अग्निः । वेनः । असुनीतिः । ऋतः । इन्दुः । प्रजापतिः । अहिः । अहिर्बुध्न्यः । सुपर्ण । पुरूरवाः । |
| | • (7) श्येनः । सोमः । चन्द्रमाः । मृत्युः । विश्वानरः । धाता । विधाता ।<br>• (8 गणाः) मरुतः । रुद्राः । ऋभवः । अङ्गिरसः । पितरः । अथर्वाणः । भृगवः । आप्त्याः ।<br>• (21 स्त्रियः) अदितिः । सरमा । सरस्वती । वाक् । अनुमतिः । राका । सिनीवाली । कुहूः । यमी । उर्वशी । पृथिवी । इन्द्राणी । गौरी । गौः । धेनुः । अघ्न्या । पथ्य । स्वस्ति । उषाः । इळा । रोदसी । |
| द्यु-स्थानम् | • (23) अश्विनौ । उषाः । सूर्या । वृषाकपायी । सरण्यूः । त्वष्टा । सविता । भगः । सूर्यः । पूषा । विष्णुः । विश्वानरः । वरुणः । केश । केशिनः । वृषाकपिः । यमः । अजः एकपात् । पृथिवी । समुद्रः । अथर्वा । मनुः । दध्यङ् ।<br>• (7 गणाः) आदित्याः । सप्तऋषयः । देवाः । विश्वेदेवाः । साध्याः । वसव । वाजिनः ।<br>• (1) देवपत्न्यः देवपत्न्यः । |

#### 2.2.2.2 यास्कनिरुक्तम्

यास्काचार्यस्य निरुक्तग्रन्थे, प्रथमाध्यायस्य 20-खण्डाश्च द्वितीयाध्यास्य 4-खण्डाश्च मिलित्वा, निघण्टुशास्त्रस्य भूमिका भवति । अत्र केचन परिशीलितांशाः—

1. प्रथमोऽध्यायः (20 खण्डाः)
   - पदानां चतुर्ध प्रकाराः → नाम + आख्यात + उपसर्ग + निपाताः
   - षड्भावविकाराः → जायते -अस्ति - विपरिणमते - वर्धते - अपक्षीयते - विनश्यति ।
   - शास्त्रारम्भ प्रयोजनम्
   - मन्त्राणाम् अनर्थकत्व+आक्षेप पुरस्सरम्
   - मन्त्राणाम् अर्थवत्वम्
   - अर्थज्ञस्य प्रशंसा
2. द्वितीयोऽध्यायः (1 – 4 खण्डाः)
   - निर्वचनम्

**चत्वारि पदजातानि नाम-आख्यात-उपसर्ग-निपाताश्च ।**

1. सत्त्वप्रधानानि नामानि
2. भावप्रधानम् आख्यातम् ।
    - भवति इति भावः । षड् भाव विकाराः भवन्ति इति वार्ष्यायणिः ।
        - I. जायते पूर्वभावस्य आदिमाचष्टे । न अपरभावामाचष्टे, न प्रतिषेधे इति ।
        - II. अस्ति उत्पन्नस्य सत्त्वस्य अवधारणम् ।
        - III. विपरिणमते अप्रच्य्वमानस्य तत्त्वाद् विकारम् ।
        - IV. वर्धते स्वाङ्गाभ्युच्चयम् । सांयौगिकानां वार्थानाम् ।
        - V. अपक्षीयते एतेनैव व्याख्यातः प्रतिलोमम् ।
        - VI. विनश्यति अपरभावस्य आदिमाचष्टे । न पूर्वभावमाचष्टे न प्रतिषेधति ।
3. न निर्बद्धाः उपसर्गाः अर्थान् निराहुः इति शाकटायनः ।
    - नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्तिः ।
    - आ, प्र परा, अभि, प्रति, अति, निर्, दुर्, नि, अव, उद्, सम्, वि, अनु, अपि, उप, परि, अधि, ...

    | | |
    |---|---|
    | आ – अर्वागर्थे; | प्र, परा – एतस्य प्रातिलोम्यम्; |
    | अभि – अभिमुख्यम्; | प्रति – एतस्य प्रातिलोम्यम्; |
    | अति, सु – अभिपूजितार्थे; | निर् दुर् – एतयोः प्रातिलोम्यम्; |
    | नि, अव – विनिग्रहार्थीयौ; | उद् – एतयोः प्रातिलोम्यम्; |
    | सम् – एकीभावम्; | वि, अप – एतस्य प्रातिलोम्यम्; |
    | अनु – सदृश्य+अपरभावम्; | अपि – संसर्गम्; |
    | उप – उपजनम्; | परि – सर्वतोभावम्; |
    | अधि – उपरिभावम्, ऐश्वर्यं वा ; | |

4. निपाताः उच्चावचेषु अर्थेषु निपतन्ति ।
    - अपि उपमार्थे ।
    - अपि कर्मोपसङ्ग्रहार्थे ।
    - अपि पदपूरणाः ।
    - इव, न, चित्, नु, च, वा, उ, हि, किल, मा, खलु, एवं, नूनं, सीम, त्व, ...

## नामाख्यातायोः केचन विशेषांशाः—

नामानि आख्यातजानि इति शाकटायनः, नैरुक्तसमयश्च । न सर्वाणि ति गार्ग्यः वैयाकरणानां च मतम् ।

*Table 14. Comaprision of Nāma and Ākhyā described in Yāska's Nirukta*

| | **नामानि** | **आख्याताः** |
|---|---|---|
| प्राधान्यम् | सत्त्व प्रधानानि (द्रव्यम्)<br>○ व्रज्या<br>○ पक्तिः | भाव प्रधानम् (क्रिया)<br>○ व्रजति<br>○ पचति |
| उपदेशः | सामान्यम् → अदः<br>विशेषम् → गौः, अश्वः, पुरुषः, हस्ति, … | सामनयम् → भवति<br>विशेषम् → अस्ते, शेते, व्रजति, तिष्ठति, … |
| विभागम् | 7-विभक्तयः | 10 लकाराः |

## निर्वचनम्

अपिहितस्य अर्थस्य परोक्षवृत्तौ अपरोक्षवृत्तौ वा शब्दे निकृष्य विगृह्य वचनं निर्वचनम् । अत्र पदद्वयम् व्याख्यातम्—

1. समर्थ-स्वर-संस्काराः
   - अत्र, उदात्तादयः स्वराः । लोपागमवर्ण विकारादयः संस्काराश्च, व्याकरण शास्त्रेन सिद्धाः ।
   - तौ उभौ प्रादेशिकेन विकारेण चान्वितौ स्यातम् । ते योगशब्दाः वा योगारूढाः वा इति ख्याताः ।
2. असमर्थ-स्वर-संस्काराः
   - अनन्विते अर्थे, अप्रादेशिके विकारे, अर्थनित्यः परीक्षेत—
     - ✓ वृत्तिसामान्येन । अक्षरवर्ण सामान्यात् च ।

अलङ्कारशास्त्रे शब्दार्थयोः वृत्तित्रयं प्रख्यातमेव । वाचक-लक्षक-व्यञ्जकत्वेन त्रिविधं शब्दजातम् । वाच्य-लक्ष्य-व्यङ्ग्यत्वेन अर्थजातमपि त्रिविधम् । अभिधा-लक्षणा-व्यञ्जनाख्याः त्रिशब्दवृत्तयः । तत्र अभिधावृत्तिः वाच्यार्थम्, लक्षणावृत्तिः लक्ष्यार्थम्, व्यञ्जनावृत्तिः व्यङ्ग्यार्थं च भासयन्ति ।

*Table 15. 3-types of relation between Śabda and Artha*

| **शब्दम्** | **वृत्तिः (व्यापारम्)** | **अर्थम्** |
|---|---|---|
| वाचक शब्दम् | अभिधा | वाच्यार्थम् |
| लक्षक शब्दम् | लक्षणा | लक्ष्यार्थम् |
| व्यञ्जक शब्दम् | व्यञ्जना | व्यङ्ग्यार्थम् |

- ✓ तत्र सङ्केतितार्थगोचरः शब्दव्यापारो ऽभिधा ।
    - सा द्विध्या रूढीपूर्विका, योगपूर्विका चेति ।
- ✓ वाच्यार्थानुपपत्या तत्सम्बन्धिन्यारोपितः शब्दव्यापारो लक्षणा ।
    - सादृस्यनिबन्धना सम्बन्धनिबन्धना चेति द्विधा लक्षणा ।
        - सादृस्यनिबन्धना सारोपा साध्यवसाया चेति द्विधा ।
        - सम्बन्धनिबन्धना च जहद्वाच्या अजहद्वाच्या चेतिद्विधा ।
    - एवं लक्षणा चतुर्विधा ।
- ✓ अन्वितेषु पदार्थेषु वाक्यार्थोपस्कारार्थम् अर्थान्तरविषयः शब्दव्यापारो व्यञ्जनावृत्तिः ।
    - सा त्रिविधा ।
    - शब्दार्थोभयशक्तिमूलकत्वेन ।

इति विद्यानाथस्य प्रतापरुद्रीयमिति साहित्यशास्त्रे काव्यप्रकरणे व्याख्यातम् ।

*Table 16. Abhidhā, Lakṣaṇā and Vyañjanā vṛttīs described in Pratāpa-Rudrīyam.*

| वाचकः → अभिधा → वाच्यम् | लक्षकः → लक्षणा → लक्ष्यम् | व्यञ्जकः → व्यञ्जना → व्यङ्ग्यम् |
|---|---|---|
| • रूढीपूर्विका<br>• योगपूर्विका | हेतुः *= 1) मुख्यार्थ बाध , 2) मुख्यार्थ सम्बन्धम्, 3) प्रयोजनम्*<br>• सदृश्या निबन्धना<br>  ○ सारोपा<br>  ○ साध्यवसाना<br>• सम्बन्धा निबन्धना<br>  ○ जहद्वाच्य<br>  ○ अजहद्वाच्य | • शब्द शक्ति मूलकम्<br>• अर्थ शक्ति मूलकम्<br>• उभय शक्ति मूलकम् |

तथा वचाक-पदानि अपरोक्षवृत्तौ, लक्षकानि व्यञ्जकानि च पदानि परोक्षवृत्तौ निर्वचनीयानि ।

**2.5 – 12 - निघण्टोः टीका**

- द्वितीयाध्यास्य पञ्चम-खण्डात् आरभ्य द्वादशाध्याय पर्यन्तं निघण्टु ग्रन्थस्य टीका व्याख्यातम् ।

**13 & 14 - परिशिष्टौ अध्यायौ**

- 13तमे अध्याये देवतानाम् अतिस्तुतिः विषयकाणां मन्त्रानां व्याख्यातम् । अत्र 50 खण्डाः निबद्धाः ।
- 14तमे अध्याये ऊर्ध्वमार्गगतिः व्याख्यातं, यथा— मरणान्तरं जीवस्य गतिः, पुनः शरीरधारणम् ... इत्यादि आध्यात्मिक विषयाः । अत्र 37 खण्डाः निबद्धाः ।

निघण्टोश्च निरुक्तस्य च ग्रन्थयोः सुखबोधाय, विषय-समीक्षणम् अत्र सूचितम्—

*Table 17. Correlation of contents in Nighaṇṭu and Nirukta*

| **निघण्टुः (पञ्चाध्यायी)** | **निरुक्तम् -14 अध्यायाः (487 खण्डाः)** |
|---|---|
| - | 1(20), 2(1-4) → भूमिका |
| नैघण्टुक काण्डम् (1, 2, 3) | 2(5-28), 3(22) → (एकार्थम् अनेक शब्दाः) |
| नैगम काण्डम् (4.1 – 4.3) | 4(27), 5(28), 6(36) → एकपदिकाः |
| दैवत काण्डम् (5.1 – 5.6) | 7(31), 8(22), 9(43), 10(47), 11(50), 12(46)<br>- देवविद्यायाः आधारभूतसिद्धान्तानां निरूपणम्<br>- सङ्कलितानां देवतानां स्वरूपनिरूपणम् |
| | 13(50) → अतिस्तुति (यज्ञाङ्गम्)<br>- देवतानाम् अतिस्तुति विषयकाणां मन्त्रानां व्याख्यानम् |
| | 14(37) → ऊर्ध्वमार्गगतिः<br>- मरणान्तरं जीवस्य गतिः, पुनः शरीरधारणम् ... इत्यादि आध्यात्मिक विषयाः । |

### 2.2.2.3 रुद्रनिर्वचनम्

निघण्टुपाठस्य दैवतकाण्डे, अन्तरिक्षस्थानीयदेवतानां विषये रुद्रस्य वर्णनं कृतम् (यास्कस्य दशमाध्याये) ।

- रुद्रो रौतीति सतः । रोरूयमाणो द्रवतीति वा । रोदयतेर्वा ।
- यद् अरुदत् तद् रुद्रस्य रुद्रत्वम् । इति काठकम् ।
- यद् अरोदीत् तद् रुद्रस्य रुद्रत्वम् । इति हारिद्रविकम् । तस्यैषा भवति (10.5)

अस्मिन्नर्थे केचन ऋचः यास्काचार्येण उदाहृताः ।

✓ इ॒मा रु॒द्राय॑ स्थि॒रध॑न्वने॒ गिर॑: क्षि॒प्रेष॑वे दे॒वाय॑ स्व॒धाव्ने॑ ।
अषा॑ळ्हाय॒ सह॑मानाय वे॒धसे॑ ति॒ग्मायु॑धाय भरता शृ॒णोतु॑ नः ॥ ऋक् 7.46.1 ॥

इमा रुद्राय । दृढधन्वने । गिरः क्षिप्रेषवे । देवाय । अन्नवते । अषाळ्हायान्यैः । सहमानाय । विधात्रे । तिग्मायुधाय । भरत । शृणोतु नः । तिग्मं तेजतेः । उत्साहकर्मणः । आयुधमायोधनात् । तस्यैषापरा भवति ॥ (निरुक्तम् 10.6)

- ✓ या ते॑ दि॒द्युदव॑सृष्टा दि॒वस्परि॑ क्ष्म॒या चर॑ति॒ परि॒ सा वृ॑णक्तु नः ।
  स॒हस्र॑ं ते स्वपिवात भेष॒जा मा न॑स्तो॒केषु॒ तन॑येषु रीरिषः ॥ ऋक् 7.46.3॥

या ते दिद्युदवसृष्टा । दिवस्परि दिवोऽधि । दिद्युद् द्युतेर्वा । क्ष्मया चरति । क्ष्मा पृथिवी । तस्यां चरति । तया चरति । विक्ष्मापयन्ती चरतीति वा । परिवृणक्तु नः सा । सहस्रं ते स्वाप्तवचन भैषज्यानि । मा नस्त्वं पुत्रेषु पौत्रेषु च रीरिषः । तोकं तुद्यतेः । तनयं तनोतेः ।

अग्निरपि रुद्र उच्यते । तस्यैषा भवति ॥ (निरुक्तम् 10.7)। अस्मिन्नर्थे ऋक् यथा—

- ✓ जरा॑बोध॒ तद् वि॑विड्ढि वि॒शेवि॑शे य॒ज्ञिया॑य ।
  स्तोम॑ं रु॒द्राय॒ दृशी॑कम् ॥ऋक् 1.27.10॥

जरा स्तुतिः । जरतेः स्तुतिकर्मणः । तां बोध । तया बोधयितरिति वा । तद्विविड्ढि । तत्कुरु । मनुष्यस्य मनुष्यस्य यजनाय । स्तोमं रुद्राय दर्शनीयम् ।

पुनस्तत्र, अन्तरिक्षस्थानानां देवगणानां व्याख्याने, अनया ऋचा रुद्रगणाः उदाहृताः ।

- ✓ आ रु॑द्रास॒ इन्द्र॑वन्तः स॒जोष॑सो॒ हिर॑ण्यरथाः सुवि॒ताय॑ गन्तन ।
  इ॒यं वो॑ अ॒स्मत् प्रति॑ हर्यते म॒तिस्तृ॒ष्णज॒े न दि॒व उत्सा॑ उद॒न्यवे॑ ॥5.57.1॥

आगच्छत रुद्रा इन्द्रेण । सहजोषणाः । सुविताय कर्मणे । इयं वोऽस्मदपि प्रतिकामयते मतिः । तृष्णज इव दिव उत्सा उदन्यवे । तृष्णक् तृष्यतेः । उदन्युरुदन्यतेः । (निरुक्तम् 11.15)

पुनस्तत्र, देवस्त्रीणां व्याख्याने— रोदसी रुद्रस्य पत्नी । तस्या एषा भवति । (निरुक्तम् 11.49)

- ✓ रथ॒ं नु मारु॑तं व॒यं श्र॑व॒स्युमा हु॑वामहे ।
  आ यस्मि॑न् त॒स्थौ सु॒रणा॑नि॒ बिभ्र॑ती॒ सचा॑ म॒रुत्सु॑ रोद॒सी ॥8॥

रथं क्षिप्रं मारुतं मेघं वयं श्रवणीयमाह्वयामहे । प्रा यस्मिन्तस्थौ सुरमणीयान्युदकानि बिभ्रती सचा मरुद्भिः सह रोदसी रोदसी ॥ (11.50)

**उपसंहारः**

निरुक्तशास्त्रस्य प्रयोजन चतुष्कम्—

1. मन्त्रेषु अर्थप्रत्ययः

2. पदविभागः
3. देवता परिज्ञानम्
4. ज्ञानप्रशंसा अज्ञाननिन्दा च । (निरुक्तम् 1.15-1.17)

तथा निरुक्तं वेदपुरुषस्य श्रोत्रमुच्यते, यथा निरुक्त-शास्त्राध्यायनात् वेदवाङ्मयस्य यथार्थज्ञानं सम्यक् वेद्यते ।

यथा पतञ्जलिनोक्तम्—

- तत्र शब्द+अर्थ+ज्ञान विकल्पैः संकीर्णा सवितर्का समापत्तिः ॥ योगसूत्रम् 1.42 ॥
- स्मृति परिशुद्धौ स्वरूपशून्य+इव+अर्थमात्र निर्भासा निर्वितर्का ॥ योगसूत्रम् 1.43 ॥

तथा, शब्दार्थज्ञानानि सम्यग् ज्ञात्वा, अर्थप्रत्यये चित्तं लीयते सति निर्वितर्का समापत्तिः भवति ।

## 2.3 ज्ञानावबोधने ज्योतिष-कल्पौ ।

### 2.3.1 ज्योतिषामयनं चक्षुः ।

ज्योतींषि = ग्रहनक्षत्राणि । तान्यधिकृत्य प्रवृत्तमिदं शास्त्रं ज्योतिश्शास्त्रम् । प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ।

यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद् वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम् ॥ (याजुषज्योतिषम् 4)

#### 2.3.1.1 त्रिस्कन्धं जयोतिश्शास्त्रम्

सिद्धान्त संहिता होरा रुपं स्कन्ध त्रयात्मकम् ।
वेदस्य निर्मलं चक्षुः ज्योतिश्शास्त्रमनुत्तमम् ॥

सिद्धन्त-स्कन्ध लक्षणम्—

तृट्यादि प्रलयान्त काल कलना मानः प्रभेदः क्रमात्
चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः सः उदाहृतोऽत्र गणितस्कन्धः प्रबन्धे बुधैः ॥

The following topics are covered in the Siddhānta-skandha:

- Different divisions of Time (Kāla)
- The placement and movement of Bhū, Nakṣatra and Graha.
- Three-questions (Dik, Deśa, Kāla)
- Solar / Lunar eclipses,
- Rising and Setting of each Graha,
- Śṛṅgonnati of Candra (Horns of a Crescent moon)
- The instruments – Yantras (like Sun-dial, Gnome, telescopes etc…)
- etc.…

संहिता-स्कन्ध-लक्षणम्—

ज्योतिः शास्त्रमनेकभेधविषयं स्कन्धत्रयाधिष्टितम् ।
तत् कार्त्स्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता ॥

Saṃhitā-skandha covers wide ranging subjects of human interest, including astrology, graha-movements, eclipses, rainfall, clouds, architecture, growth of crops, manufacture of perfume, matrimony, domestic relations, gems, pearls, rituals, etc.…

होरा-स्कन्ध-लक्षणम्—

होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् । Horā is derived from "aHORĀtram", first and last letters having removed. The śāstra is broadly classified into Jātaka & Praśna. Jātaka (Natal) considers the Birth time, while Praśna (Horary) is based on the Questioning time. Horā-śāstra primary deals with:

- Graha, Nakṣatra and Rāśi descriptions
- Calculation of Āyu (life-span)
- Various combinations of Grahas; Rāja Yoga and Daridra Yoga combinations.
- Lagna and 12 Bhāvas
- Timing of predictions based on Daśa systems / Aṣṭakavargu / Gocāra.
- etc.…

Vedāṅga Jyautiṣam by Lagadhācārya is the foundational for all other Vedic / Classical texts on the Jyautiṣam. It explains the concepts of graha - nakṣatra – rāśi, and describes the nature of kāla (time) based on the concept of breathing. Some of the Vedic / Classical texts are listed below.

*Table 18. Selected texts on 3-skandhās of Jyautiṣam*

| स्कन्धत्रयम् | | केचन आर्षग्रन्थाः | केचन लौकिक-ग्रन्थाः |
|---|---|---|---|
| सिद्धान्त ज्योतिषम् | गणितम् / तन्त्रम् | • सूर्य सिद्धान्तः (मयः) | • आर्यभटीयम् (आर्यभट्टः)<br>• पञ्चसिद्धान्तिका (वराहमिहिराचार्यः)<br>• शिष्यधीवृद्धितन्त्रम् (लल्लाचार्यः)<br>• ब्रह्मस्फुटसिद्धान्तम् (ब्रह्मगुप्तः)<br>• सिद्धान्तशिरोमणिः (भास्कराचार्य-2)<br>• सिद्धान्ततत्त्वविवेकः (कमालकारभट्टः) |
| फलित ज्योतिषम् | होरा | • बृहत् पराशर होरा शास्त्रम् (पराशरः) | • बृहज्जातकम् (वराहमिहिराचार्यः)<br>• ताजिक नीलकण्ठी (नीलकण्ठः)<br>• प्रश्नमार्गः (नारायण नम्बूद्रिः) |

| | | | |
|---|---|---|---|
| | | | • सारावली (कल्याणवर्मः)<br>• जातकपद्धतिः (श्रीपतिः)<br>• जातकपरिजातः (वैद्यनाथ दीक्षितः)<br>• फलदीपिका (मन्त्रेश्वरः) |
| | संहिता | • गर्गसंहिता<br>• वसिष्ठसंहिता<br>• नारदसंहिता<br>• भृगुसंहिता<br>• कश्यपसंहिता | • बृहत् संहिता (वराहमिहिराचार्यः)<br>• अद्भुतसागरः (लक्ष्मणसेनः, भल्लालसेनः)<br>• मुहुर्तचिन्तामणिः (श्रीरामदैवज्ञः)<br>• स्वरोदयम् (नरपति दैवज्ञः) |

#### 2.3.1.2 काल-दर्शनम्

Patañjala maharṣi describe the concepts of TIME through the below sūtras.

- भुवनज्ञानं सूर्ये संयमात् । PYS 3.26.
- चन्द्रे ताराव्यूह ज्ञानम् । PYS 3.27
- ध्रुवे तद्गति ज्ञानम् । PYS 3.28

As also explained in the Haṭhayoga-pradīpikā, the saṃyama on Sūrya and Candra bestows the knowledge of time by revealing the nature of 14-lokās and the arrangement and movement grahās / nakṣatrās and rāśi-cakra.

सूर्य-चन्द्रम् असौ धत्तः कालं रात्रिन्दिवात्मकम् ।
भोक्त्री सुषुम्ना कालस्य गुह्यम् एतद् उदाहृतम् ॥ हठयोगप्रदीपिका 4.17॥

The below picture (`Figure 5. A solar-year with 12-saṅkrānti's reflecting in a day of 60-nāḍīs`) represents, how a solar-year of 6 Ṛtu's, 12 Saṅkrāntis and 12-Cāndra-māsās can be observed in a day of 60 nāḍi's. Each Saṅkrānti represents an alternating piṅgala & iḍā breathing cycle at every 5-nāḍis (2 hours) interval through 12-rāśi's. From Sunrise, generic timings of various ṛtu's are listed below.

- 0 – 10 nāḍi: Vasanta-ṛtu.
- 11-20 nāḍi: Grīṣma-ṛtu
- 21-30 nāḍi: Varṣa-ṛtu
- 31-40 nāḍi: Śarad-ṛtu
- 41-50 nāḍi: Hemanta-ṛtu
- 51-60 nāḍi: Śisira-ṛtu

*Figure 5. A solar-year with 12-saṅkrānti's reflecting in a day of 60-nāḍīs*




The concept of time with its 2-divisions (akhaṇḍa and khaṇḍa), is well explained in the text Sūrya-Siddhānta, revealed by Sūrya Bhagavān to Mayāsura.

लोकानामन्तकृत् कालः कालोऽन्यः कलनात्मकः ।

स द्विधा स्थूलसूक्ष्मत्वात् मूर्त+अमूर्तश्च उच्यते ॥ सूर्यसिद्धान्तः 1.10 ॥

1. लोकानामन्तकृत् कालः → Indivisible form of time, akhaṇḍa-kāla.
2. कालोऽन्यः कलनात्मक → Divisible form of time, khaṇḍa-kāla.

## लोकानामन्तकृत् कालः (अखण्डः)

कालः सृजति भूतानि, कालः संहरति प्रजाः ।

This is indivisible form of kāla, the cause of birth and death in the world. There are 4-types of Pralayās described in Indian philosophy:

1. Nitya: Every cell grows and decays continuously. Continuous transformation of birth & death cycles
2. Naimittika: At the end of each Brahma day. Entire solar system will be dissolved.
3. Prākṛtika: At the end of Brahma life. Entire creation will be dissolved.
4. Ātyantika: An individual is liberated, no more re-birth cycles. i.e., mokṣa.

## कालोऽन्यः कलनात्मक (खण्डः)

This is divisible form of kāla, is again of 2 types. Mūrta (gross) and Amūrta (subtle).

1. Mūrta → This consists of gross divisions of the time such as, Prāṇa, Vināḍī, Nāḍī... until Kalpa and Parāyu.
2. Amūrta → This consists of subtle divisions of the time, such as Truṭi, Reṇu, Lava, Līkṣaka and Lipta.

The basic measurable unit of time is the prāṇa, i.e., one breathing unit; and 6 such prāṇās make 1 vināḍī, and 60 such vināḍis make a day. So, one day consists of 21600 prāṇās (breaths). A month consists of 30 such days, and a year consists of 12 such months. The concept of devatās is explained as, those yogi's whose breath is 360 times slower than the normal humans. So, one human year equals one day of devatās. 12000 such divine years become one mahāyuga consisting of kṛta+treta+dvāpara+kali yugas, having 43,20,000 human years. 1000 such mahāyugas form one day of brahma, who is the adhi-devatā of Ahaṅkāra tattva. (सूर्यसिद्धान्तः, 1.11 – 1.21)

*Table 19. Details of time from Tṛṭi till Paramāyu in Sūrya-Siddhānta*

| | |
|---|---|
| अमूर्तः कालः | • 1 तृटिः = 30.86 nano-seconds<br>• 60 तृटयः = 1 रेणुः = 1.851851 micro-seconds<br>• 60 रेणवः = 1 लवः = 0.1111 milli seconds<br>• 60 लवाः = 1 लीक्षकः = 6.6666 milli-seconds<br>• 60 लीक्षकाः = 1 लिप्तः / विपलः = 0.4 seconds |
| अहोरात्रम् / दिनम् | • 10 लिप्ताः = 1 प्राणः (श्वासः + प्रश्वासः) = 4 seconds.<br>• 6 प्राणाः = 60 लिप्ताः = 1 विनाडी / 1 पलः / 1 विघटी = 24 seconds.<br>• 60 विनाड्यः = 1 नाडी / 1 दण्डः / 1 घटी = 24 minutes<br>• 2 नाड्यः = 1 मुहुर्तः = 48 minutes<br>• 60 नाड्यः = 1 नाक्षत्रम् अहोरात्रम् = 30 मुहुर्ताः = 21,600 प्राणाः = 24 hours |
| | • सावन दिनम् → अर्कोदयैः,<br>• चान्द्र दिनम् → तिथिभिः,<br>• सौर दिनम् → सङ्क्रान्त्या |

| | |
|---|---|
| मासः / वर्षम् | • 30 नाक्षत्र अहोरात्राणि = 1 मासः<br>  ○ 30 तिथयः = 1 चान्द्र-मासः<br>  ○ 30 सौरदिनानि = 1 सौर-मासः<br>• 12 मासाः = 360 सौर-दिनानि ~ 365.25 सावन-दिनानि = 1 सूर्याब्दम् = 1 दिव्यम् अहोरात्रम्<br>  ○ 6 मासाः = सुराणाम् अहः = असुराणाम् रात्रिः |
| दिव्यं वर्षम् | • 360 दिव्य-अहोरात्राणि = 1 दिव्यम् वर्षम् (आसुरम् एव च) = 360 सूर्याब्दानि |
| महायुगः / चतुर्युगम् | 12,000 दिव्य वर्षानि = 1 चतुर्युगम् = 43,20,000 सूर्याब्दानि (सन्ध्या सन्ध्यांश सहितम्)<br>• कृतयुगः = 4 धर्मपादाः = (4/10) x चतुर्युगम् = 4800 दिव्य वर्षानि = 17,28,000 सूर्याब्दानि<br>• त्रेतायुगः = 3 धर्मपादाः = (3/10) x चतुर्युगम् = 3600 दिव्य वर्षानि = 12,96,000 सूर्याब्दानि<br>• द्वापरयुगः = 2 धर्मपादौ = (2/10) x चतुर्युगम् = 2400 दिव्य वर्षानि = 8,64,000 सूर्याब्दानि<br>• कलियुगः = 1धर्मपादः = (1/10) x चतुर्युगम् = 1200 दिव्य वर्षानि = 4,32,000 सूर्याब्दानि<br>सन्ध्ययोः → कृतयुगादीनाम् षष्ठाम्शः<br>• कृतयुग-सन्धिः = 1/6th x 4800 दिव्यवर्षानि = 800 दिव्य वर्षानि = 2880 सूर्याब्दानि ।<br>• त्रेतायुग-सन्धिः = 1/6th x 3600 दिव्यवर्षानि = 600 दिव्य वर्षानि = 2160 सूर्याब्दानि ।<br>• द्वापरयुग-सन्धिः = 1/6th x 2400 दिव्यवर्षानि = 400 दिव्य वर्षानि = 1440 सूर्याब्दानि ।<br>• कलियुग-सन्धिः = 1/6th x 1200 दिव्यवर्षानि = 200 दिव्य वर्षानि = 720 सूर्याब्दानि । |
| मन्वन्तरः | • मन्वन्तरः = 71 चतुर्युगानि<br>• मन्वन्तर सन्धिः = कृताब्दसङ्ख्या = 4800 दिव्य वर्षानि = 17,28,000 सूर्याब्दानि |
| कल्पः | • कल्पः = 14 मन्वन्तर + 15 सन्धिः = 1000 चतुर्युगम् = 432,00,00,000 सूर्याब्दानि<br>• 1 ब्राह्मम् अहः → भूत-सृष्टिः |

| | |
|---|---|
| | • 1 ब्राह्म रात्रिः → भूतसम्हार-कारकः । |
| परमायुः | • परमायुः = 100 ब्राह्म वर्षाणि = 36,000 ब्राह्म अहोरात्राणि = 72,000 कल्पाः<br>• परार्थः = ½ परमायुः |

आयुषो ऽर्धमितम् तस्य शेषकल्पो ऽयम् आदिमः ॥ सूर्यसिद्धन्तः 1.21

कल्पाद् अस्माच् च मनवः षड् व्यतीताः ससन्धयः ।

वैवस्वतस्य च मनो र्युगानाम् त्रिघनो गतः ॥ सूर्यसिद्धन्तः 1.22

Brahma's 1st parārtha has already been completed, and it's now the 1st Kalpa (beginning day) of his 2nd parārtha, called as Śveta-varāha-kalpa. In this Kalpa, 5124th year of Kaliyuga in the 28th Mahāyuga of the 7th Manvantara is ongoing now (as of April 2022 AD).

## नवविध-कालमानानि

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा ।

सौरं च सावनं चान्द्रं आर्क्षं मानानि वै नव ॥ सूर्यसिद्धान्तः 14.1

*Table 20. 9-types of Kālamāna*

| Kāla māna | Divisions of Time. |
|---|---|
| 1. Brahma māna | • Manvantara, Kalpa, Parārtha, Paramāyu |
| 2. Deva māna | • 1 Solar year = 1 Day of devatās. |
| 3. Pitṛ māna | • Śukla + Kṛṣṇa pakṣa = 1 Cāndra māsa = 1 day & night of Pitṛ devatās |
| 4. Prajāpati māna | • Kali+Dvāpara+Tretā+Kṛta Yuga, Manvantara, Manu-sandhi |
| 5. Bṛhaspati māna | • 60 samvatsaras (Prabhava, Vibhava, …etc.) |
| 6. Saura māna | • Sun in each Rāśi for 1 month. 1 year for full revolution. |
| 7. Sāvana māna | • Sāvana day = Time between 2 sun-rises. |
| 8. Cāndra māna | • Tithi / Cāndra māsa from Amāvāsya to Paurṇamī. |
| 9. Nākṣatra māna | • 24 Hours = 60 NĀḌĪ |

**Time-scales in different lokās:**

The description of various lokās and the Yogi's residing in them is explained in the Vyāsa-bhāṣyam on Pātañjala Yogasūtram, भुवनज्ञानं सूर्ये संयमात् । 3.26. The summary of the discussion is presented in the below table.

*Table 21. 14-lokās described in Vyāsa-bhāṣyam on Yogasūtrās.*

| **लोकः** | **संवेगाः** | **समाधिविशेषाः** |
|---|---|---|
| सत्यलोकः | त्रिविधो ब्रह्मः | प्रधानवशिनो यावत्सर्गायुषः ।<br>– अच्युताः सवितर्कध्यानसुखाः ।<br>– शुद्धनिवासाः सविचारध्यानसुखाः ।<br>– सत्याभा आनन्दमात्रध्यानसुखाः ।<br>– संज्ञासंज्ञिनः अस्मितामात्रध्यानसुखाः । |
| तपोलोकः | | भूतेन्द्रियप्रकृतिवशिनः । द्विगुणद्विगुणोत्तरायुषः । |
| जनलोकः | | भूतेन्द्रियवशिनः । द्विगुणद्विगुणोत्तरायुषः । |
| महर्लोकः | प्राजापत्यः | महाभूतवशिनः । ध्यानाहाराः कल्पसहस्रायुषः । |
| स्वर्लोकः | माहेन्द्रः | सङ्कल्पसिद्धा अणिमाद्यैश्वर्योपपन्नाः । कल्पायुषो वृन्दारकाः कामभोगिन औपपादिकदेहा उत्तमानुकूलाभिरप्सरोभिः कृतपरिवाराः । |
| भुवर्लोकः | आध्रुव-ग्रह-नक्षत्र-तारा विचित्रः अन्तरिक्षलोकः । | |
| भूलोकः | जम्बू-शाक-कुश-क्रौञ्च-शाल्मल-मगध-पुष्कर द्वीपाः । इक्षुरस-सुरा-सर्पिः-दधि-मण्ड-क्षीर-स्वादूदकाः सप्तसमुद्राः । | |
| 7 पातालाः | पाताले जलधौ पर्वतेषु एतेषु सुर-गन्धर्व-किन्नर-किंपुरुष-यक्ष-राक्षस-भूत-प्रेत-पिशाच-अपस्मारक-अप्सर-ब्रह्मराक्षस-कूष्माण्ड-विनायकाः प्रतिवसन्ति । | |

- Bhū-loka and Bhuvar-loka yogi's are called as Ṛṣi's. They use a calendar combining the Saura, Sāvana, Cāndra and Nakṣatra mānās.
    - Their life-span is 120 solar-years in Kaliyuga.
    - Their average breathing time is 4-seconds.
- Bṛhaspati-māna, Deva-māna and Pitṛ-māna are applicable for the Yogi's of Svar-loka. These are called Devarṣi's and their life-span is upto 1-Kalpa.

- 1 day of Pitṛ = 30 lunar-days. So, 120 Pitṛ years ~ 3600 years is the average life-span of Pitṛ devatās. Their breathing is 30 times slower than humans. So, the average breathing time = 4*30 seconds = 2 minutes.
- 1 day of deva = 360 solar days. So, 120 deva years = 43,200 solar years, is the average life-span of devatās. Their breathing is 360 times slower than humans. So, the average breathing time = 4x360 seconds = 24 minutes.
- The life-span of Devarṣi's is 1 Kalpa = 1000 Mahayugās. This is 4.32 crore times the human-life-span. So, their breathing is 4x4.32 crore seconds = 5.56 Solar-years

- Prajāpati-māna is applicable for Mahar-loka yogi's. These are called Maharṣi's and their life-span is around 1000 Kalpa's.
  - So, their average breathing time is 5.56*1000 years = 5560 years.
- Brahma-māna is applicable for the Yogi's, attaining the state of Jana-loka / Tapo-loka / Satya-loka. These are called Brahmarṣi's and their life-span is upto 72,000 Kalpās (same as Brahma's paramāyu).
  - So, their average breathing time is 5.56 x 72,000 years = 4,00,000 years.

*Table 22. Lifespan and Breathing details in each Loka*

| Kālamāna | Applicable Loka | Life span | 1 Breathing time |
|---|---|---|---|
| Brahma māna | Janaloka, Tapoloka, Satyaloka | 72000 Kalpas | ~ 400,000 Solar-years |
| Prajāpati māna | Maharloka | ~1000 Kalpas | ~ 5560 Solar-years |
| Bṛhaspati māna | Svarloka | ~ 1 Kalpa | ~ 5.56 Solar-years |
| Deva māna | Svarloka | ~ 43200 years | > 24 Minutes |
| Pitṛ māna | Svarloka | ~ 3600 years | ~ 2 Minutes |
| Saura māna | Bhūloka | 120 years | ~ 4 seconds |
| Sāvana māna | | | |
| Cāndra māna | | | |
| Nākṣatra māna | | | |

